अ० सा ५ त

नमु बुद्धिवदात्मनोपि क्रमदृश्यत्वलिंगेन स्वविषयबुद्ध्यप्रकाशनायक्रमेण परिणामोऽनुमियतामित्याशंक्यबु ८
द्धिवृत्तीनामपर्यायक्रमेण स्वप्रकाश्यत्वान्नैवमित्याह ॥ मतिवृत्तय इति ॥ आत्मचितासर्वा अपि मतिवृत्तयः सत
तंविदिताः प्रकाशिताः इतियावत् ततः कारणादात्मा अविकृतः परिणामीनभवतीत्यर्थः ॥ आत्मनः परिणामांगी
कारेदोषमाह ॥ यदि चात्मचितिरिति आत्मचितिः परिणामवती यदि चिद्रूप आत्मा परिणामी यदि तर्हि मतयो वि
दिताविदितास्युः ज्ञाताज्ञाताभवेयुस्तच्चायुक्तं युगपदेव सर्वासां तद्वृत्तीनामात्मप्रकाश्यत्वदर्शनादिति ॥ १० ॥ आ बुद्धि ५

मतिवृत्तय आत्मचिताविदिताः सततं हि यतोऽविकृतस्कोततः ॥
यदि चात्मचितिः परिणामवती मतयो विदिताविदिताः स्युरिमाः ॥ १० ॥
चरितं तु धियः सकलं सततं विदितं भवता परिपुष्टचिता ॥ मति
भेदगुणो नहितेस्तिततो यत एवमतोऽसदृशस्तु धिया ॥ ११ ॥

त्मनः परिणामित्वे विदिताविदितत्वप्रसंगेन दोष उत्पादितस्तत्रेदमाशंकते नायं दोषो अस्माकं तथैवोपलंभा
दिति तत्राह ॥ चरितमिति धियो बुद्धेः सकलं चरितं सततं विदितमितियतस्ततः ॥ कारणादिदं तव चोद्यं निर्युक्तिक
मित्यर्थः ॥ सकलस्यापि धीचरितस्यात्मप्रकाश्यत्वेनात्मनो अपरिणामित्वे सिद्धे बुद्ध्यात्मनोः परिणामित्वापरिणा
मित्वेन वैलक्षण्यं सिद्धमित्याह ॥ मतिभेदेति चिदात्मना निखिलं धीचरितं सततं विदितमितियतस्तत एव बुद्धि
दृशस्ते मतिभेदगुणो नास्ति मतिभेदस्य गुणः परिणामो नास्तियतस्तत स्त्वं तया असदृशो बुद्ध्यासमो न भवसि बुद्धेः
परिणामित्वादात्मा बुद्धिविलक्षण इत्यर्थः ॥ ११ ॥

ननु तथाप्यात्मनः ॥ संसारित्वात्कथमात्मनो ब्रह्मत्वमित्याशंक्य शेषसंसारधर्मविशिष्टांतःकरणोपाधिनिबंधनत्वा-
दात्मसंसारि बद्धतिपरमार्थतोऽसार्यैवात्मेत्याह ॥ दिनकृदिति ॥ सर्वविषयाणां युगपदेवभासकतया दिनकृत्समभया
सदृशेन स्वचिता स्वयंप्रकाशेनाविकृतेन भवता सकलं जनचित्तरतं सकलप्राणिनां धीचरितं सदा विदितं प्रकाशित
मितियतः स्ततः कारणात्सदा कालत्रयेपि त्वमसि तएव सिञ् बंधन इति धातुः ॥ संसार्यैव सितः सितो न भवतीत्यसितः
बंधरहित इत्यर्थः ॥ ननु यद्यात्माविकृतः परिणामी न भवति कस्तर्ह्यस्मिन् शरीरे परिणामी मतिरेव परिणामिनी

दिनकृत्समभयासदृशेन सदाजनचित्तरतं सकलं स्वचिता ॥ विदितं भवताऽविकृतेन सदा यत एव मतोऽसित
एव सदा ॥ उपरागमपेक्ष्य मतिर्विषये विषयावधृतिं कुरुते तु यतः ॥ तत एव मते विदिताऽविदिता विषयास्त ष
ततः परिणामवती ॥५॥

नात्मेति कस्मादित्यत आह उपरागमिति ॥ यदार्थोत्तरस्य पदार्थांतराकारभजनमुपरागः क्वचित्तज्ज्ञेयस्य ज्ञेयांत
रेणमतवति यथा स्फटिकस्य जपाकुसुमेन क्वचित् ज्ञानस्य ज्ञेयेनोपरागो भवति यथा साक्षिणः साक्ष्येण बुद्धेर्बोध्य.
स्यार्थजातेन स च बुद्धेर्बाह्योपरागः क्रमेणाकतिपयैरेव विषयैर्भवति तद्धेतत्क्रमवत्कतिपयविषयोपल
छिकार्यान्नेयं तस्मान्मतिः ॥ क्रमेण विषये रूपरागमपेक्ष्य विषयाकारपरिणाममपेक्ष्य विषयावधृतिं कुरुते
विषयनिश्चयं करोति तत एव मतेर्विषयाः केचन विदिताः ॥ केचिन्नाविदिता ॥ यतः एवमतः ॥ कारणान्मतिः ॥
परिणामवती आत्मानपरिणामी सर्वदा ॥५॥

अ०तिसार ६

ननु विगुणं ब्रह्मेत्ययुक्तं ब्रह्मण आत्मत्वादात्मनश्चाहंकारगुणत्वादित्याशंक्याहंकारस्य बुद्धिपरिणाम
त्वान्नैवमिति प्रतिपादनाय बुद्धिवृत्तेर्द्वैविध्यमाह ॥ विषयाकृतीति ॥ व्यवहारविधौ व्यवहारदशायां मन
नसो बुद्धेर्द्विधा वृत्तिस्तत्रैकविधा विषयाकृतिसंस्थितिः ॥ विषयाकारेण दृश्याकारेण संस्थितिरेकवि
धेत्यर्थः ॥ अपरा तद्विषया दृश्यघटादिविषया घटमहं द्रक्ष्यामीत्येवमाकाराद्द्रष्ट्राकारेति यावत् ॥

वृतिरेध मनसुश्रा तमधर्मः

॥ विषयाकृतिसंस्थितिरेकविधा मनसस्तु सदा व्यवहारविधौ ॥ अहमित्यपि तद्विष
या त्वपरा मतिवृत्तिरवज्वलितात्मचिता ॥ १४ ॥ पुरुषस्य तु धर्मवदुद्भवति स्वरसेन
मतेः स्वगुणोपि सती ॥ अत आत्मगुणं प्रतियंति जना मतिवृत्तिमिमामहमित्यबुधाः ५।

आत्मचिता अवज्वलिता यस्याः (तस्याः) दृश्याकाराद्द्रष्ट्राकारेति द्विविधापि मतिवृत्तिरेव मतिधर्म इत्यर्थः ॥ १४ एवन ल तमधर्म
ननु अहंवृत्तेरहंकारस्यात्मधर्मत्वेन प्रतिभानं कथमित्याशंकायामध्यासादित्याह ॥ पुरुषस्येति ॥ अहंवृ
त्तिः ॥ स्वरसेन मतेः ॥ स्वगुणोपि [illegible] पुरुषस्य धर्मवदुद्भवति ॥ अविवेकादात्मधर्मवत् प्र
तिभाति ॥ यत एवमतः ॥ कारणादहं ममेति मतिवृत्तिमात्मगुणत्वेनाबुधा जना एव प्रतियं
ति जानंति न तु विद्वांस इत्यर्थः ॥ १५

यद्यहंवृत्तिरात्मधर्मो न भवति तर्हि तस्या अपलाप एव युक्त इति तत्राह ॥ यदि सा न भवेदिति ॥ जनमोहि
नीदेवानामपि व्यामोहकरी साहंवृत्तिर्न भवेत् ॥ यदि तर्ह्यहं करोम्यहं जानामीत्यादिकमिमं व्यवहारं ज
नो नानुभवेत्तस्मादहंकारस्यापलापो न युक्त इत्यर्थः ॥ तर्हि व्यवहारसिद्ध्यर्थमहंवृत्तिर्भवतु ॥ तस्यास्त्वा
त्मगुणत्वप्रतिभानं तु माभूत् ॥ आत्मनः ॥ परमार्थतो निर्गुणत्वादित्याशंक्य विपक्षे दूषणमुत्यापपन्ने
तामाशंकां निराचष्टे ॥ विफलश्चेति ॥ यदाहंवृत्तिर्ज्ञगुणेनेति विदिताऽध्यासमुखेनाहंवृत्तेरात्मधर्म
त्वं यदा नाभ्युपगम्यते तदा विषयानुभवो विफलो भवेत् ॥ एतदु[illegible]क्तं भवति ॥ आत्मनस्त्वकामाय संवि
यदि सा न भवेज्जनमोहकरी व्यवहारमिमं न जनोनुभवेत् ॥ विफलश्च तदा विषयानुभवो ज्ञगुणे
न हि सेति यदा विदिता ॥ १६ ॥ उपलम्भघटादिनिभैव भवेन्मनसो यदि संस्थितिरेकविधा ॥ पुरु
षस्य चितिश्च न विक्रियते न मतिर्वृत्तिमपेक्ष्य घटादिनिभा ॥ १७ ॥
यं भवति पिप्पलं स्वादति ॥ निर्गुणं गुणभोक्तृ चेत्या
दिना आत्मनो व्यवहारदशायां विषयाद्यनुभवितृत्वश्रुतिः संदिग्धा भवेत् ॥ तस्माद्व्यवहारावस्थायाम
ध्यासमुखेनाहंकारस्यात्मधर्मत्वमभ्युपगंतव्यमिति ॥ १६ ॥ विपक्षे दोषमुदीरयन् ॥ यथोक्तमेवार्थं प्रपं
चयत्युत्तरश्लोकद्वयेन ॥ उपलम्भ[illegible]ति मनसः संस्थितिरेकविधा विषयाकारवृत्तिरेव यदि किंच घ भवेत् २
टादिनिभा मतिर्वृत्तिमपेक्ष्य पुरुषस्य चितिश्च न विक्रियते यदि अध्यासद्वारेणात्मनो दृश्याकारपरिणामे
नाभ्युपगम्यते यदि तर्ह्युपलम्भघटादिनिभा वृत्तिरेव भवेत् दृश्याकारवृत्तिरेव भवेत् ॥ द्रष्टाकारवृत्तिरिति न भवेत् ७

३

[illegible]

गु० तिस ८ तर्हि गुणिन्यवस्थितः सन् गुणो गुणिना तद्गुणैर्वा प्रकाश्यतामित्यत आह॥ न गुणो गुणिनीति॥ गुणिनि स्थित
तस्य वान् गुणो गुणिना गुणिनो गुणैर्वा न विषयी क्रियते न प्रकाश्यते हंकाराख्यो गुणो ज्ञानगुणेन न प्रकाश्य
त इत्यर्थः कुतः कारणद्गुणिना गुणेन प्रकाश्यत इत्यत आह॥ नहीति गुणस्याहंकारस्य गुणिन आत्मनः
सकाशाद्देशकृता भिदा नास्ति आत्मनः॥ सर्वगतत्वात्तथा वस्तुकृता भिदा नास्ति विचार्यमाणे परमात्म
व्यतिरिक्त वस्त्वंतराभावाद्वस्तुनिबंधनो भेदो नास्तीत्यर्थः॥ भेदस्य धर्मिप्रतियोगिसापेक्षत्वात् घटा

न गुणो गुणिनि स्थितवान् गुणिना विषयी क्रियते न च तस्य गुणैः॥ न हि देशकृता न च व
स्तुकृता गुणिनोऽस्ति गुणस्य भिदा तु यतः॥ २३॥ न परस्परमग्निगुणो ग्निगतो विषय
त्वमुपैति कदाचिदपि न हि वह्निरपि स्वगुणं स्वगतं विषयीकुरुते स्वगुणेन भुवि॥

त्पटस्य भेद इव धर्मिप्रतियोगिनोश्च भेदसापेक्षत्वादन्योन्याश्रयादिदोषप्रसंगात् कस्यापि भेदो दु
र्निरूप्य इति भावः॥ ज्ञानगुणो नाहंकारेण न प्रकाश्यत इत्यत्र हेतुमाह॥ न परस्परमिति अग्निगतोऽग्नि
गुणः परस्परमन्योन्यं प्रकाशाख्येन गुणेन न विषयीकुरुते न प्रकाशयति॥ अदृष्टत्वात्तस्माद्गुणि
२२ न गुणस्यैव वेद्यत्वं वा अथवा गुणिनो गुणैर्वा वेद्यत्वं न संभवतीत्यर्थः॥ अहंकारस्यात्मगुणत्वेन स्या
त्मना प्रकाश्यत्वायोगादहंकार आत्मगुणो न भवतीत्युक्तं॥ २४॥ श्रीराधामाधवाभ्यो नमः १

गुणो ज्ञानगुणेन प्रकाशगुणो वा कदाचिदपि विषयत्वं नोपैति परस्परं प्रकाश्यप्रकाशकभावं नोपैति तर्हि[illegible]

स्वानुभवप्रमाणसिद्धमर्थं संक्षिप्य कथयन्नुपपादितमर्थमुपसंहरति ॥ अपहायेति लोके कश्चिदपि ज-
नः कदाचिदहंकरणमपहाय परित्यज्य व्यवहारस्नानभोजनादिकं नोपैति यतस्ततः कारणान्मतेरहं-
कृतेर्व्यवहारपथं प्रतिकारणतोपपन्नतरामुत्तरामेवोपपन्नेत्यर्थः ॥२०॥ व्यवहारांगत्वेनाहंकारं प्रसाध्य
इदानीं तस्यात्मधर्मत्वमुतानात्मधर्मत्वमथवोभयधर्मत्वमिति विकल्पयित्वा आत्मधर्मत्वं निराक-
र्तुमाह ॥ चितिशक्तिगुण इति अहंकरणं चितिशक्तिगुणः ॥ किं चिद्रूपस्यात्मनो गुणः ॥ किमुत बुद्धेर्गु-

अपहाय न कश्चिदहंकरणं व्यवहारमुपैति कदाचिदपि ॥ उपपन्नतरा हि मतेस्तु ततो व्यवहार-
पथं प्रति कारणता ॥२०॥ चितिशक्तिगुणः किमहंकरणं किमु बुद्धिगुणो यमवेद्भयोः ॥ इति
चिंत्यमिदं मनसानलसैरुपपत्तिभिरात्महितं यतिभिः ॥२१॥ उपलभ्यमहंकरणं न भवेत्पुरु-
षस्य गुणो यदि तर्हि भवेत् ॥ गुणिरूपमथो वयवं गुणिनो न विहाय गुणः पृथगस्ति यतः ॥२२॥

णः ॥ अथवा बुद्ध्यात्मनोरुभयोर्गुण इति त्रयं मनसानलसैरालस्यरहितैर्यतिभिः रूपपत्तिभिर्युक्तिभिश्चिं-
त्यं विचार्यं किमर्थमात्महितं आत्महिताय मोक्षायेत्यर्थः ॥२१॥ उपपत्तिभिर्विचार्यमाणे किं युक्तमित्याकां-
क्षायामात्मगुणत्वमयुक्तमित्याह ॥ उपलभ्येति ॥ अहंकरणं पुरुषगुणो भवेद्यदि तर्हि तदहंकरणं पुरुषोपल-
भ्यं न भवेदात्मनाप्रकाश्यं न भवेत् तत्र हेतुमाह ॥ गुणिरूपमिति ॥ गुणः [redacted] धर्मो धर्मी गुणिरूपं गुणि-
स्वरूपं गुणिनोवयवं वा विहाय गुणिनः सकाशात्पृथक् न तिष्ठति यथा पटगतं शौक्ल्यं पटं तदवयवभू-
तं तंतुं विहाय पृथक् न तिष्ठति तथा सति तयोरभेदात् प्रकाश्यप्रकाशकभावो न घटत इति भावः ॥२२॥

तद्वदहंकारस्यात्मगुणत्वेदात्मनः ।

सावयवयोरेवमूर्तयोः संयोगो भवतीत्येतत्स्वयमूह्यमिदं दृष्टमपरित्यजता अविस्मरता युक्तेरित्यर्थः ॥ २८ ॥ ननु यदि द र्शनं प्रमाणं
५ अ० ति सा ननु यदि नित्यस्यानित्यगुणेन संबंधो नास्ति कथमात्ममनसोर्नभोमुशलयोश्च संयोगाख्यो गुण इति चे तर्हि २
९ न्नैवं तस्याप्रसिद्धेरित्याह मनसेति ॥ २७ ॥ स्पष्टं इहेति इह सावयवं रज्जु घटादीनितरेतरतः ॥ परस्परं युजां यो
गं समुपैतीत्येतल्लोके दृष्टं यतः अतः कारणादतोन्यद दृष्टमपि यद्दृष्टं तत्रापि सावयवनिरवयवयो
रपि नभोमुसलयोः ॥ संयोगदर्शनादत्रापि दर्शनं प्रमाणं भवतीत्याशंक्याह ॥ नभसोऽतींद्रियत्वात्सम न
वायिनः ॥ संयोगस्यापि तथात्वात् दर्शनं प्रमाणं न भवेदित्याह ॥ नहीति विगतावयवैः सावयवं वस्तु
वि मनसा पुरुषः पुरुषेण मनो नभसा मुशलं मुसलेन नभः ॥ नहि योगवियोगमुपैति कु
तोवयवित्वनिराकरणादमुतः ॥ २७ ॥ इह रज्जुघटादि हि सावयवं समुपैति युजामित
रेतरतः ॥ इति दृष्टमतोन्यददृष्टमपि स्वयमूह्यमिदं त्वपरित्यजता ॥ २८ ॥ नहि सावयवैर्विगतावय
सा वैर्विगतावयवं न चावयवैः ॥ उपयाति युजामिति दृष्टमिदं यत एवमतः स्थितमुक्तमदः ॥ २९ ॥ दर्शनं
विगतावयवं च सावयवैर्युजां नोपैतीतीदमेव लोके दृष्टं न तु सावयवनिरवयवयोः कुत्रापि दृष्टः येनैव प्रमा संयोग: १
णं स्यात् ॥ अयं भावः नभोमुशलयोः संयोगः प्रत्यक्षो न भवति संयोगाश्रयस्यातींद्रियत्वे सति संयोगस्यापि
तथात्वात् वायुवनस्पतिसंयोगवदिति तस्मान्नभोमुमुसलयोः ॥ संयोगस्यातींद्रियत्वेन द्रष्टुमशक्यत्वात्
अत्रापि दर्शनं प्रमाणमिति पूर्ववादिनोक्तमचतुरमिति यथोक्तन्यायेन साधितमर्थमुपसंहरति ॥ यत इति यतः
एवं यस्मादेवं सावयवयोरेव संयोगो दृष्टस्ततः ॥ कारणान्मदुक्तं स्थितमात्ममनसोर्नभोमुशलयोर्वा संयो
गो न भवतः इति यन्मया प्रोक्तं तदिदं स्वस्थमित्यर्थः ॥ २९ ॥

…नेदमाशंकते बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मगुणा आत्मविशेषगुणा इति कणादवचनात्कथमा
त्मनो निर्गुणत्वं प्रतिपाद्यत इत्यत्राह। कणभुग्येति परमार्थतो नात्मगुणमनात्मनो बुद्धेर्गुणमनित्यं यावद्द
व्यभाविनं गुणं पूर्वं गुणसमूहं कणभुक् कणादैरात्मगुणं [illegible]मचीक्लृपत्। आत्मगुणत्वेन कल्पि
तवान्स गुणपूगः। अनयैव दिशा सम्यक् निराक्रियतां यथाहंकारस्यात्मगुणत्वे तस्यात्मनाऽप्रकाश्यत्वं
न घटते गुणगुणिनोरत्यंतभेदाभावात् तथा बुद्ध्यादिरप्यात्मगुणश्चेन्न स्यात्मनाऽप्रकाश्यत्वेन घटत इत्य
नया दिशा निराक्रियतामित्यर्थः। किंच बुद्ध्यादिरनित्यत्वादपि नित्यात्मगुणत्वं न घटत इति हेत्वंतरमा

कणभुग्यमचीक्लृपदात्मगुणं गुणपूगमनित्यमनात्मगुणं। अनयैव दिशा सनिराक्रियतां
नहि नित्यगुणे न गुणी ॥२५॥ वियतः प्रभवं प्रवदंति यतः श्रुतयो बहुशः खमनित्यमतः॥

तस्माह नहीति। नित्यमात्मवस्तु अनित्ये न बुद्ध्यादिगुणेन गुणी न भवतीत्यर्थः॥२५॥ ननु नित्यस्याकाशस्य
नित्येन शब्दगुणेन गुणित्वं दृष्टं तद्वदत्रापि भविष्यतामित्याशंक्याह। वियत इति। तस्माद्वा एतस्मादात्मन आ
काशः संभूतः नाभ्या आसीदंतरिक्षमित्याद्याः श्रुतयो बहुशः। बहुवारं वियतः। आकाशस्य प्रभवमुत्पत्तिं वदं
ति यतः। अतः कारणात् खमाकाशमनित्यमतः। कारणादाकाशदृष्टांतेनात्मनो अनित्यगुणेन गुणित्वं न
साधयितुं शक्यमित्यर्थः। तर्ह्याकाशव्यतिरिक्तं नित्यद्रव्यमात्मनोऽनित्यगुणे न गुणित्वे दृष्टांतभूतं वैशेषि
कसमये किंचित्प्रसिद्धमस्तीत्याशंक्य परिहरति। उपमानमिति। इह कणादकृते वियतोऽन्यदनित्यगुणं
हा एक गुणं नित्यं नित्यद्रव्यं दृष्टांतभूतं नास्ति तस्मादात्मनो अनित्यगुणे न गुणत्वं न संभवतीत्यर्थः॥२६

१ अहंकारस्याविस्तरेणाना सत्वं प्रतिपादते १

श्री० सार एवंप्रसंगादागतं करणद्रमतं निराकृत्येदानीमहंकारस्यांतःकरणधर्मत्वमनुसंदधानस्तस्यात्मगुणत्वमसं
१० कुचितमित्याह उपलभ्यमिति ॥ अहंकरणमुपलभ्यं दृश्यं भवितुं क्षमते दृशिरूपमात्रवस्तु स्वयंप्रकाशत्वादु
पलभ्यं न भवेदित्यतः कारणाद्दृश्यस्याहंकारस्य दृगात्मगुणत्वं न घटतेऽतोऽहंकारस्यापि विषयाकृतिरंजितधी
गुणवद्दृश्यत्वमेव तल्लक्षात्मगुणत्वं न संभवति किं त्वंतःकरणधर्मत्वमेवेत्यर्थः ॥३३॥ अहंकारस्यात्म
गुणनिराकरणपूर्वकं परिशोधितस्य त्वंपदार्थस्य परिशोधितेन तत्पदार्थेनैक्यलक्षणवाक्यार्थं कथयति
विषयप्रकृतिमिति ॥ विषयप्रकृतिं प्रतिपन्नवती मतिवृत्तिर्दृश्याकारां मतिं वृत्तिं मते दृश्याकारपरिणाम
उपलभ्यमहंकरणं भवितुं क्षमते दृशिरूपगुणो नयतः ॥ विषयाकृतिरंजितधीगुणवद्दृश्यत्वमहं
करणस्य ततः ॥३३॥ विषयप्रकृतिं प्रतिपन्नवती मतिवृत्तिमहंकरणं च मतेः ॥ उभयं परिपश्यति योऽवि
कृतः परमात्मसदुक्तिरसौ पुरुषः ॥३४॥ ननु देहभृद्देशे कथं भवताभिहितः परमात्मसदुक्तिरिति ॥ न
हंकरणं च तदुभयं धीपरिणामं यः प्रत्यगात्माऽविकृतः सन्परिपश्यत्यसौ बुद्धिसाक्षी पुरुषः स्वयमेव परमा
त्मसदुक्तिर्हि परमात्मेत्युच्यते नान्योऽतोऽस्ति द्रष्टा तत्त्वमसीत्यादिश्रुतेरित्यर्थः ॥३४॥ उक्तसमन्वये प्रत्यक्षा
दिप्रमाणान्तरविरोधमाशंकते नन्विति ॥ एवं देहभृत्संसारित्वेन प्रतीयमानो जीवस्तद्विरुद्धपरमात्म
ति भवता कथमभिहित इ[illegible]दार्थयोः [illegible]धर्मस्य प्रतीयमानस्य संसा
रस्यांतःकरणोपाधिनिबंधनत्वान्मैवमिति विरोधं परिहरति नविरुद्धमिति ॥ मायातत्कार्यांतःकरणोपाधिवि
रोधाभावदुभयत्रापि विशिष्टयोरैकत्वासंभवेऽपि जहदजहल्लक्षणया विरुद्धांशप्रहाणेनाविरुद्धचै
दानंदप्रत्यग्बोधस्य त्वंपदलक्ष्यार्थस्य पूर्णसदानंदाद्वयबोधस्य तत्पदलक्ष्यार्थस्य चैकलक्षणलक्षित
त्वे न विरोधासंभवान्न किंचिदपि विरुद्धमवादिष्मित्युक्तं ॥३५॥

ननु निरवयवत्वेप्युपचरितावयवैः संयोगो भविष्यतीति चेन्नैवमित्याह नहि कल्पितेति विगतावयवस्य स्वत
एव निरवयवस्य वस्तुनः कल्पितभागसमागमनं संयोगो न घटेत कुत इत्यत्राह वितथत्वमतिरिति परिक
ल्पितवस्तुषु वितथत्वमतिः मिथ्यात्वबुद्धिः सुदृढा शुक्तिरजतादौ सम्यग्व्याप्ता अतः कारणात्कल्पितभागसम
६४ गमनं न घटत इत्यर्थः ॥ ३० ॥ किंचात्मनो बुद्ध्यादिभिरनित्यैर्गुणैर्गुणवत्वं ब्रुवाणस्य वैशेषिकस्यानुमानस्य दृष्टांताये
हितत्वात् एवंरूपस्य दृष्टांतस्य नित्यं निर्गुणमेवाद्वितीयं ब्रह्म ततोन्यत्सर्वं वाचारंभणमनित्यमिति ब्रुवंतं वेदांत
वादिनं प्रति दर्शयितुमशक्यत्वाच्च नित्यमनित्यगुणेन गुणीत्यस्य पक्षस्यासंभव एवेत्याह श्लोकद्वयेन इहवेदशिर

नहि कल्पितभागसमागमनं विगतावयवस्य घटेत कुतः ॥ वितथत्वमतिः सुदृढा तु यतः परिकल्पि
तवस्तुषु इत्यमुतः ॥ ३० ॥ इह वेदशिरस्सु तदर्थविदः प्रवदंति समस्तजगत्प्रकृतिं ॥ परमात्मपदं दृशि
मात्रवपुर्ध्रुवमेकमतोन्यदनित्यमिति ॥ ३१ ॥ अत एव न किंचिदुदाहरणं ध्रुवमस्ति परस्य विनाशिगु
गुणं यत एवमतः स्थितमुक्तमदो नहि नित्यमनित्यगुणेन गुणी ॥ ३२ ॥ राधामाधव जी सहाय

इति ॥ इह वेदांतमते तदर्थविदो वेदांततात्पर्यज्ञाः एकमेवाद्वितीयं ब्रह्म नित्यं विभुं सर्वगतं सुसूक्ष्मं ब्रह्मैवेदं सर्वं आत्मैव
सर्वं खल्विदं ब्रह्म वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्येवमादिषु वेदशिरस्सु परमात्मपदमेव वस्त्व
सि२ स्ति ततोन्यदनित्यमिति वदंति कीदृशं परमात्मपदं समस्तजगत्प्रकृतिं निखिलजगद्विवर्ताधिष्ठानमतए
व दृशिमात्रवपुः केवलज्ञप्तिविग्रहमत एवैकं नानात्वरहितं ध्रुवं सत्यमतोन्यज्जगत्सर्वमनित्यं ॥ ३१ ॥
अत एवेति अत एव परस्य वैशेषिकस्य विनाशिगुणं वस्तु नित्यं किंचिदप्युदाहरणं नास्ति यत एवमतः
कारणान्नित्यमनित्यगुणो न गुणी न भवतीति यत्पूर्वमुक्तं तदिदं सुस्थमित्यर्थः ॥ ३२ ॥ ३२ ॥

तदेवब्रह्मेत्यादिकांतवल्लकारश्रुतिंप्रकटयति॥ सार्द्धश्लोकद्वयेन यद्वदनभ्युदितमिति॥ तच्चयद्वाचा ऽनभ्यु
दितमित्यादियन्मनसानमनुत इत्यंतमिमंभागंविवृणोति॥ यद्वदनभ्युदितमिति॥ सदावदनेनवागिंद्रियेणय
दात्मतत्त्वमनभ्युदितंसाक्षादनभिहितंसदानयनेनचक्षुरिंद्रियेणयत्तत्त्वंनपश्यतिसदाश्रवणेनश्रोत्रें
द्रियेणयन्नशृणोतिजनःसदांतःकरणेनापियत्तत्त्वंनमनुतेरूपादिराहित्यादुभयकरणेनापिनात्म
तत्त्वंप्रकाश्यतेस्वयंप्रभत्वादित्यर्थः॥ तर्हिशास्त्रोपदेशानर्थक्यमितिनमंतव्यंअविवेकादात्मन्यारोपितानात्म

यद्वदनभ्युदितंवदनेनसदानयनेनचपश्यतियन्नसदा॥ श्रवणेनचयन्नशृणोतिसदामनसा।
पिचयन्नमनुतेनसदा॥३७॥ वदनंनयनंचतथाश्रवणंमनएवचयेनमतं सततं॥ अव
गच्छतदेवपदंपरमंत्वमितिश्रुतिरीह्नितुरुक्तवती॥३८॥

धर्म्मनिरसनेनात्मनोनित्यमुक्तत्वप्रतिपादकत्वादितिभावः॥ येनवागभ्युद्यतेऽग्रणीयत इतीमंभागंविवृणोतिव
दनमितिसततंवदनंवागिंद्रियंनयनंचक्षुरिंद्रियं॥ तथाश्रवणंश्रोत्रेंद्रियंमनएवचकारान्नत्यरिणमश्चमतंप्रका
शितंजडस्वभावंवागादिकरणंचिद्रूपेणात्मनाऽनुगृहीतमेवस्वविषयेप्रवर्तितुंक्षममित्यर्थः॥ तदेवब्रह्मत्वं
विद्धिइतीमंभागंविवृणोति॥ अवगच्छेति॥ त्वंतदेवपरमंपदमात्मत्वेनाऽवगच्छेतीत्यंप्रकारेणश्रुतिरीह्नितुःहृष्य
मिच्छोरधिकारिणः॥ पुरुषस्यात्मतत्त्वमुक्तवती उपदिष्टवती॥ इत्यंवंपरमात्मपदत्वतन्त्रतिपादकेयंश्रुतिश्च रा
अल्पकणोक्तिरीयत्वमाणत्वेनाभिहितापदर्शिता ममतं नमतेरमनस्तादिदमिति॥ अल्पकणशोलेमत ११
उक्तेत्यंकणोक्तिरूपाप्रदर्शितेत्यर्थः॥३७॥

अस्मिन्नर्थे श्रुतिप्रमाणयति अमतमिति अमतं मतं विज्ञातं विज्ञातृ इत्यक्षरब्राह्मणं । न मतेर्मन्तारं मन्वीथा इत्यु
षस्तिब्राह्मणं । अमतो मंतेत्यं तयोमिब्राह्मणं तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्मा ब्रह्मेति मधुब्राह्मणं
तत्वमसीति छांदोग्यं च तदिति विवक्षितं । इदं सर्वं यदयमात्मेति मैत्रेयीब्राह्मणं यदेवेह तदमुत्र यदमुत्र तदन्विह मृ
त्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति कठवल्ली । यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि
नेदं यदिदमुपासत इति केनोपनिषत् । कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्निति क

अमतं न मतेरमतस्तदिदं यदमुत्र तदेव तु कश्चिदिति ॥ श्रु
तिभिः प्रतिपादितमस्य दृशेः परमात्मपदत्वममूढभृशं ॥ ३६ ॥

कठवल्ली तथा च श्रुत्यंतरं अंतर्याम्यमृतः स यश्चायं पुरुषे यश्चासावादित्ये स एकः तत्वमसि अहं ब्रह्मास्मि
अयमात्मा ब्रह्म प्रज्ञानं ब्रह्म । ब्रह्मैवेदममृतं पुरस्तात् । ब्रह्म पश्चात्परिशिष्टं आत्मा वा इदं ब्रह्म वा इदं यो
ऽसावसौ पुरुषः सोऽहमस्मि । अन्यदेव तत् अन्यत्र धर्मात् । अशब्दमस्पर्शमुच्यते यत्तदद्रेश्यं तदव्ययं । तद्वा
एतदक्षरं गार्गि किञ्चिन् । ब्रह्मैव सन् [illegible] द्यमूः श्रुतिभिरस्य दृशेः बुद्धितद्वृत्तिसाक्षिणः प्रत्यग्बोध
स्य परमात्मपदत्वं सुरैवैकतानकूटस्थज्ञप्तिस्वरूपत्वं भृशं तात्पर्येण प्रतिपादितं यस्मात्तत्त्वंपदार्थ स्मात
योः तदात्म्ये कश्चिदपि विरोधो नास्तीत्यर्थः ॥ ३६ ॥

ब्रह्माप्येति ब्रह्मवेद ब्रह्मैव भवतीत्या

०सार यदिजीवपरयोरंशांशित्वादिलक्षणः क्रियानपिभेदोनास्तितर्हिजीवइतिनामभेदः कथमित्याशंक्याह क
१२ रकादीति एकस्यापिवियतःकरकादिनिमित्तकमेवघटाद्युपाधिनिबंधनमेवयथाकरकांवरमितिनाम
भवेत्तथापरमात्महशेरपिहग्रूपस्यपरमात्मनोपिपुरहेतुकमेवशरीरहेतुकमेवजीवइतिनामभेदोभ
वेत्नवस्तुतःभेदइत्यर्थः ॥४१॥ किंचाविकृतस्यैवब्रह्मणः प्रवेशश्रवणाच्चनविकारोवयवोजीवइत्याह
जनितमिति परमात्मेति सदिति अक्षरमितिचनामविभर्तीतिपरमात्मसदक्षरनामभृत् [illegible] परमात्म तेनपू

करकादिनिमित्तकमेवयथाकरकांवरनामभवेद्वियतः परमात्महशेरपिनामतथा
पुरहेतुकमेवतुजीवइति ॥४१॥ जनितंवियदग्राणियेनजगत्परमात्मसदक्षरना
स मभृताप्रविवेशैवजगत्स्वकृतंखमिवेहघटंघटसृष्टिमनु ॥४२॥४२॥४२

सदक्षरनामभृतायेनवियदग्राणिआकाशादिकंजगज्जनितंसृष्टंसपरमात्मैवस्वकृतंस्वमाययानि
र्मितंजगज्जीवात्मनाप्रविवेशप्राविशत् निरंशस्यपरमात्मनः कथंप्रवेशइत्यत्राह खमिति घटसृष्टि
मनुयथाखमाकाशंघटंप्रविशतितद्वदित्यर्थः निरवयवस्यसर्वगतस्यात्मनःबुद्ध्यभिव्यक्तिमात्रमेवप्रवे
शः ननुदेवदत्तादेर्गृहादिप्रवेशवदितिभावः एवंतावत्तत्सृष्ट्वातदेवानुप्राविशत्सएषइहप्रविष्टआ
नखाग्रेभ्यः अतःप्रविष्टःशास्ताजनानामितिप्रवेशवाक्याच्चतुर्विधेषुदेहेष्वंतःकरणसाक्षितयाप्रविष्ट
स्यपरमात्मनएवजीवइतिनामभवेद्यस्मात्तस्माज्जीवःपरमात्मनोशोविकारश्चनभवेदित्युक्तं ॥४२॥४३

एवं तवल्लकारश्रुतिं प्रपंचयित्वा इदानीं छांदोग्यश्रुतिं प्रपंचयति ॥ अणिमादिगुणमिति ॥ अणिमादिगुणं सयएं
षोणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इत्यादिश्रुतिप्रसिद्धमणिमादिगुणकं स्वहंम त्वं
सर्वगतत्वं स्वयंप्रभादिगुणकं सदिति प्रकृतं सदेव सोम्येदमग्र आसीत्तदैक्षत तत्तेजोसृजतेत्यादिना निखि
लजगत्कारणत्वेन प्रकृतं वस्तु यद्ब्रह्म तदेव त्वमसीति श्रुतिरेकत्वमप्यवदत् ॥ उपदिष्टवती अनेन जीवे

परमात्मपदत्व इयं च मया श्रुतिरल्पकणेक्रिरिहाभिहिता ॥ अणिमादिगुणं सदिति प्र
कृतं तदसि त्वमिति श्रुतिरप्यवदत् ॥ ३९ ॥ नभसो वयवो विकृतिश्च यथा घटिकादि नभो
नभ एव तु तथा ॥ परमात्मन एष न चावयवो विकृतिश्च शरीरभृदित्यमृषा ॥ ४० ॥ ४० ॥

एषाबुद्धिमृ
षानभवे
ति

नात्मनानुप्रविश्य नामरूपे व्याकरवाणीति प्रवेशश्रवणात्सद्रूपं ब्रह्मैवात्मेत्यर्थः ॥ ३९ ॥ श्रुतेः स्वतः प्रमा
ण्यावष्टंभेन मया प्रत्यगात्मनो ब्रह्मत्वमभ्यधायि तत्रेदमाशंकते ॥ उक्तश्रुतिहृदयस्यांशांशिभेदे तात्पर्यं नास्ति
अंशांशीभावगमकत्वं प्रकृतिविकृतिभावगमकत्वं वेति तत्राह ॥ नभस इति घटिकादिनभः ॥ घटिकाद्या
काशः नभसः अनवच्छिन्नाकाशस्यावयवो विकृतिश्च यथा नभ एव तथा एषः शरीरभृज्जीवपदार्थो
पि परमात्मनोऽवयवो विकृतिश्च न भवेदिति एषा बुद्धिरमृषा न भवेत् किंतु यथार्थेत्यर्थः ॥ ४० ॥

मृषा

क्र०सार इत्यस्य सृष्टिवाक्यस्य सृष्टिपरत्वमयुक्तमित्याह ॥ अनृतत्वमिति ॥ विकृतेर्विकारस्यासत्कृद्बहुवारमनृतत्वमवा
१२ दिमिथ्यात्वमुक्तं ॥ किंच सदेवसत्यमिति च निरधारि निर्द्धारितं ॥ अत्र प्रमाणमाह ॥ श्रुतिभिरिति ॥ वाचारंभणं
विकारो नामधेयमित्यारभ्य तत्सत्यं स आत्मा तत्त्वमसीत्यादिश्रुतिभिर्बहुधा बहुप्रकारेण दृष्टांतेन कार्य
स्य जगतोऽसत्त्वं कारणस्य ब्रह्मणः सत्यत्वं च निर्द्धारितं तस्माज्जगतो जन्म न विधेयमित्येतद्भगवतम
स्याभिरित्यर्थः ४४ सृष्टिवाक्यस्य मिथ्याभूतसृष्टिपरत्वमयुक्तं किं त्वेकत्वपरत्वमित्युक्तं इदानीं तत्त्वमसिवा
क्यस्य सृष्टिपरत्वं कस्मान्न भवेदित्यत आह नचेति जगतो जनिमात्रविधौ तत्त्वमसीति वाक्यस्य जन्म

अनृतत्वमवाद्यसकृद्विकृतेर्निरधारि सदेव तु सत्यमिति ॥ श्रुतिभिर्बहुधेतदतो वगतं ज
गतो नहि जन्म विधेयमिति ॥ ४५ ॥ न च तत्त्वमसीत्यसकृद्वचनं जगतो जनिमात्रविधौ घ
टते ॥ परमात्मपदानुमतिं तु यदा जनयेत्पुरुषस्य तदा घटते ॥ ४६ ॥

मात्रप्रतिपादनपरत्वेपि फलवत् ॥ ज्ञानजनकत्वाभावात्तत्त्वमसीत्यसकृद्वचनं पुनः पुनरसकृदभ्यासो न घ
टते ॥ अविवक्षितार्थस्यासकृदभ्यासासंभवात् ॥ अयं भावः ॥ संभवत्येकवाक्यत्वे वाक्यभेदो पि नेष्यते इति
न्यायात् सृष्टिवाक्यस्य महावाक्येनैकवाक्यत्वे संभवति सति तद्विपर्यासेन महावाक्यस्य सृष्टिवाक्यशेषत्वं न
घटते नैरर्थ्यप्रसंगादिति ॥ ननु तत्त्वमसिवाक्यस्य सृष्टिपरत्वं यथा न घटते तथा सृष्टिवाक्यस्य तत्त्वमसि महा
कृ वाक्यशेषत्वमपि न घटत इत्यत्राह ॥ परमात्मेति ॥ पुरुषस्य प्रत्यगात्मनः ॥ परमात्मपदानुमतिं ब्रह्मत्वबुद्धिं य १२
दा जनयेन्महावाक्यं तदा वाक्यजनितज्ञानस्य मोक्षफलत्वात्तच्छेषतया सृष्टिवाक्यमपि घटत इति विपरीतं चेन्न घटत इत्

इदानीमस्मिन्नर्थे सृष्टिवाक्यमपि प्रमाणमित्याह ॥ उं पद्येति ॥ परमात्मनः सकाशात्खप्रमुखं जगदुं पद्यत इत्य
पियाः सृष्टिश्रुतयः एतस्माज्जायते प्राणो मनः ॥ सर्वेंद्रियाणि च तस्माद्वा एतस्मादात्मनः आकाशः संभूत इ
त्यादिभिः श्रुतिभिरप्यभेदमतिरेवावधार्यते कथमवधार्यत इत्यत्राह ॥ परमात्मेति ॥ परमात्मकार्यस्य जग
तस्तत्प्रविष्टस्य जीवस्यापि परमात्म तावन्मात्रत्वप्रतिपादनेनाभेदमतिरेवावधार्यते प्रकाश्यते सर्वं खल्वि
दं ब्रह्म वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं ॥ नान्योतोस्ति द्रष्टेत्यादिश्रुतिभिरित्यर्थः ॥ ननु सृष्टिवा ४३

८। उं पद्यत खप्रमुखं हि जगत् परमात्मन इत्यपियाः श्रुतयः ॥ अवधार्यत आभिरभेदमतिः
परमात्मसतत्त्वसमर्पणतः ॥ ४३ ॥ यदि सृष्टिविधानपरं वचनं फलशून्यमनर्थकमे
मेव भवेत् ॥ जगदित्थमजायत धातुरिति श्रवणं पुरुषस्य फलाय न हि ॥ ४४ ॥ ४४ ॥

क्यं सृष्टिप्रतिपादनपरमेव नाभेदप्रतिपादनपरमपि एकस्य वाक्यस्य नानार्थतायाः अन्याय्यत्वादित्याशंक्य
विपक्षे दूषणमाह ॥ यदीति ॥ वचनं सृष्टिवाक्यं सृष्टिविधानपरं यदि तर्हि तद्वचनं फलशून्यं विधानमनर्थक
मेव भवेत् ॥ सृष्टिपरत्वे कथं फलशून्यत्वमित्यत आह ॥ जगदित्थमिति धातुः परमेश्वरात् जगदित्थमजायते
ति श्रवणमात्रं श्रोतुः पुरुषस्य फलाय आत्यंतिकदुःखनिवृत्तये न भवेत् हि यस्मादेवं तस्मात्सृष्टिप्रतिपा
दनपरत्वे ऽशेषानर्थनिवृत्तिलक्षणफलाभावादानर्थक्यं प्रसज्येत ॥ फलवत्संनिधावफलं तदंगमिति न्या
यात्स्र्ववाक्यस्य स्वतः ॥ फलवत्त्वाश्रवणादेकत्वप्रतिपादकवाक्यस्य तरति शोकमात्मवित् ॥ ब्रह्मविदाप्नोति प
रमिति न बिभेति कुतश्चनेति फलवत्त्वश्रवणात्सृष्टिवाक्यमपि तत्त्वमसिवाक्यशेषभूतं चेत्फलवत्स्यादित्यर्थः ॥ ४६ ॥

अं० सार वाक्यं नवस्तुसतत्त्वविबोधनफलं न वस्तुस्वरूपप्रतिपादनपरं तर्हि किंपरमित्यत्राह ॥ सदुपासनेति ॥ अतःका
१४ रणान्तत्त्वमस्यादिवाक्यमेमतेन विरोत्स्यति वाक्यस्योपासनाविधिपरत्वादखंडैकरसवस्तुपरत्वाभावान्नह्य
वयमस्मत्मतं प्रतिहन्तुं नह्यमतइतिभावः ॥ ४९ ॥ वाक्यस्योपासनाविधिपरत्वं दृष्टांतेन साधयति ॥ मनेति मनो १
ब्रह्मेत्युपासीतं आदित्यो ब्रह्मेत्युपासीत ॥ आकाशो ब्रह्मेत्युपासीत ॥ अन्नं ब्रह्मेत्यादिश्रुत्या मनआदिषु कारणदृ
ष्टिविधिः ॥ मनआदौ कारणब्रह्मोपास्तिर्विधीयते तथाच प्रतिमासु भगवद्ध्यानं छन्नलांछितासु स्वमतीरनपो
ह्य अधिष्ठानबुद्धिमपरित्यज्य देवधियां करणं देवत्वबुद्ध्यारोपणं तद्वदत्रापि त्वमसीतिवचनात्तत्त्वमसीति तं०
मंतुवस्तुसतत्त्वविबोधनकृद्धि निवर्तयेदप्रतिबोधमिदं ॥ सदुपासनकर्मविधानपरं अतएवमतं
न विरोत्स्यति मे ॥ ४९ ॥ मनआदिषु कारणदृष्टिविधिः ॥ प्रतिमासु च देवधियां करणं स्वमतीरन
पोह्य यथात्तु तथानु तथा त्वमसीह सदात्ममतिर्वचनात् ॥ ५० ॥ अथवा त्वमिति ध्वनिवाच्यमि
दं सदसीतिवदेद्वचनं गुणतः ॥ विभयं पुरुषं प्रवदंति यथा मृगराडयमीश्वरगुप्त इति ॥ ५१ ॥
जीव वाक्येनेह त्वं पदार्थभूतेजीवत्वमपरित्यज्य सदात्ममतिर्विधीयते सद्रूपब्रह्मदृष्टिर्विधीयते ॥ एकत्वपरत्वप्र
माणांतरविरोधान्नतरहमस्मीतिचेतोधारणमेव विधीयत इत्यर्थः ॥ ५० ॥ तत्त्वमसीवाक्यमुपासनापरमित्येकं
पक्षं प्रदर्श्य इदानीं गुणवादपरमथवास्त्विति परमथवा विपरीतबोधकमिति पक्षांतराण्युदाहरति ॥ गुणवा
दपरवादी श्लोकद्वयेन ॥ अथेति इदंतत्त्वमसीतिवचनं त्वमिति ध्वनिवाच्यंजीवं गुणतो गुणवादेन सदसीतिव
देत गुणवादपरत्वे दृष्टांतमाह ॥ विभयमिति ॥ विभयं निर्भयं पुरुषं प्रवदंति यथायमीश्वरगुप्तो मृगराडयं देवदत्तः सिंहइ

स्ततो वा इमानि भूतानि जायंते ॥ तत्सृष्ट्वा तदेवानुप्राविशत् ॥ य आत्मनि तिष्ठन्नात्मानमंतरो यमयती त्यादीनां पंच विधाऽपवादवाक्यानामभेद एव तात्पर्यमिति दर्शयित्वा इदानीमविरोधं निगमयति ॥ स्थिरेति स्थिरजंगमदेहधियां चरितं जीवात्मनायाबुद्धिः तन्नयस्तायः पुरुषो विकृतः सुन्यरिपश्यत्यसो पुरुषः स्वयमेव परमात्मसदुक्तिरि तियत्पूर्वं मयाफणितं तदित्थं प्रकारेण श्रुतिष्वियं प्रमाणंतर विरोधपरिहारेण प्रतिष्ठापितवानस्मीत्यर्थः ॥७७॥ [illegible] नमेदं तु [illegible] न सहते यत्तत्वमसिवाक्यं जीवब्रह्मणोरंशांशित्वादिलक्षणमीष

स्थिरजंगमदेहधियां चरितं परिपश्यति योऽविकृतः पुरुषः ॥ परमात्मसदुक्तिरसाविति यत्फ णितं तदितिष्ठियमित्यमहं ॥७७॥ पृथगेव यदात्मतरलो मतिविन्मकरोदकवन्न घटांबरवत् ॥ नं विरोत्स्यति तत्वमसीतितदा वचनं कथमेव तदित्यपि च ॥७८॥

तदामकरोदकवदत्यंतभेदं सुतरां न सहते

द्भेदमपि न सहते इत्याह पृथगेति ॥ यदा मतिवित् बुद्धिसाक्षी मकरोदकवत् मत्स्योदकयोरिव अत्यंतः ब्रह्मणः ॥ सकाशात्पृथगेव भिन्न एव न तु घटांबरवत् ॥ यथा घटाकाशस्य महाकाशादुपाधिकृतो भेदो यदा नांगीक्रियते ॥ तदा तत्त्वमसीति वचनं कथं न विरोत्स्यति जीवपरयोर्मत्स्योदकवत्परमार्थभेदांगीकारे तत्वमसि वाक्यविरोधः स्यादेवेत्यर्थः ॥ ननु वस्तुपरत्वे सति भेदं न सहते तत्वमस्यादि वाक्यं न तस्य वस्तुपर त्वं नास्ति उपासनापरत्वादित्याशंकते पूर्ववादि नत्विति ॥ अप्रतिबोधमज्ञानं निवर्तयदिदं तत्वमस्यादि

श्र०सा तत्वमसिवाक्यस्योपासनावाक्यवैलक्षण्याद्वस्तुपरत्वमेवेति साधयन्नाह सिद्धांती ॥ त्वदिति ॥ तत्वमसीतिवच
२५ नस्य त्वदुदाहृतवाक्यविलक्षणतात्वयोदाहृतं मनोब्रह्मेत्यादिवाक्याद्विलक्षणतास्तीति यतस्ततः कारण
दिदं वचनं दृष्टिविधानपरं उपासनाविधिपरं न भवेत् किं तर्हि सत् एव सदात्मकतागमकं जीवात्मनाऽवि
ष्टस्य सत एव ब्रह्मण एव सदात्मकतागमकं ब्रह्मत्वबोधकमित्यर्थः ॥ ५५ ॥ तत्वमसिवाक्यस्योपासनावाक्याद्वै
लक्षण्यं साधयति ॥ इतीति ॥ इति शब्दशिरस्कपदोक्तामतिर्विहितास्ति मनआदिषु मनआदित्यादिश्रुते वच

त्वदुदाहृतवाक्यविलक्षणता वचनस्य हि तत्वमसीतियतः ॥ अतएव न दृष्टिविधानपरं
सतएव सदात्मकतागमकं ॥ ५५ ॥ इति शब्दशिरस्कपदोक्त मतिर्विहिता मनआदिषु ते
र्वचनैः नविधानमिहास्ति तथा वचनेषु विलक्षणमेतदतो वचनात् ॥ ५६ ॥ मनसो विय
तः सवितृप्रभृतेः ॥ प्रवदंति न तानि सदात्मकतां ॥ मनआदिहि मुख्यमुपास्यतया प्रवदंति

नैः मनोब्रह्मेत्यादिभिर्वाक्यैर्विहिता इह वचने तु तथाविधानं नास्तीत्यस्मिन् तत्वमस्यादिवाक्ये तथाविधेति
शिरस्कपदेनउक्तदृष्टिविधानं नास्तीति यस्मात्तस्मादतो वचनान्मनोब्रह्मेत्यादिवाक्यादेतत्तत्वमसिवाक्यंसु
विलक्षणं सुतरां विलक्षणमित्यर्थः ॥ ५६ ॥ यदुपासनावाक्यवैलक्षण्यं तत्वमसिवाक्यं वस्तुनिष्ठं तर्हि मनो
ब्रह्मेत्यादीन्यपि वस्तुनिष्ठान्येवेत्यत्राह ॥ मनस इति सवितृप्रभृतेः सवितारमारभ्य मनसो वियतश्चतानि मनोब्र
ह्मेत्यादीनि सदात्मकतां सद्रूपब्रह्मात्मकतां न प्रवदंति मनआदेर्ब्रह्मात्मकतां न प्रवदंति न बोधयंति ॥ तर्हि
किं कुर्वंतीत्यत्राह ॥ मनआदीति ॥ मुख्यं यामनआदित्यादिकमत्र दृष्टियुतं ब्रह्मदृष्टियुतं ब्रह्मदृष्टियुतमुपास्य

स्कृतिपरत्वंदर्शयति॥ यदीति यथादातारंपुरुषंमघवानसिविष्णुरसीतिस्तुवंतियाचकास्तथात्रापिस्तुतये
स्तुत्यर्थंतेजीवंस्तौतुसदसीतिवदेद्वाक्यमित्यर्थः॥विपरीतबोधकत्वंदर्शयति॥त्वमिति॥अथवातत्वमसीतिवचनं
सतः॥सद्रूपस्यब्रह्मणस्त्वमितिध्वनिवाच्यसतत्वकतामेवत्वंपदवाच्य॥जीवात्मकतामेववदेत्॥ब्रह्मणोजीव
त्वमेवबोधयेद्वाक्यमित्यर्थः॥५२॥ननुकिमनयाक्लिष्टकल्पनयास्वारसिकंजीवस्यब्रह्मत्वमेवकिमितिन

यदिवास्तुतयेसदसीतिवदेन्मघवानसिविष्णुरसीतियथा॥त्वमितिश्रुतिवाच्यसतत्व
कतामथवासतएववदेद्वचनं॥५२॥यदितत्वमितिध्वनिनाभिहितःपरमात्मसतत्वकए
वसदा किमितिस्वकमेवनरूपमवेत्प्रतिबोध्यतएवयतोवचनैः॥५३॥अतएवहिजीव
सदात्मकतांनहितत्वमसीतिवदेद्वचनं॥यदपीदृशमन्यदतोवचनंतदपिप्रथयेदनये

बोधयेद्वाक्यमित्यत्राह॥यदीति॥तत्वमसिवाक्येत्वमितिध्वनिनाभिहितोजीवः सदापरमात्मसतत्वकएव
यदितर्हिएषजीवःस्वकंस्वरूपंकिमितिनावित्॥स्वस्यस्वाभाविकब्रह्मत्वंकिमितिनजानातिनतुस्वार
सिकंब्रह्मत्वंकिंतुप्रतिबोध्यनएवेतियतस्ततःकारणादस्यब्रह्मत्वंस्वारसिकंनभवतीत्यर्थः॥५३॥उक्त
मर्थंनिगमयतिपूर्ववादी॥अतइति॥अतएववाक्यस्योपासनापरत्वादेवतत्वमसीतिवचनंजीवस्यसदा
त्मकतांनवदेत्ब्रह्मत्वंनबोधयेत्हियस्मादेवंतस्मादतोन्यदपीदृशंयद्वचनंमहावाक्यंतदप्यनयैव
दिशाप्रथयेद्दुर्नयेदित्यर्थः॥५४॥

वृटी॥२०॥

अ॰सार ननु ब्रह्मसामानाधिकरण्ये यदि मन आदेरनृतत्वं भवेत्तर्हि जीवस्यापि तत्त्वमसिवाक्ये ब्रह्मसामानाधिकरण्य
२६ श्रवणादनृतत्वं कथं न भवेदिति पूर्वपक्षी चोदयति नन्विति जीवसतोरपि तत्त्वमित्येकविभक्त्यभिधानम
भिन्नविभक्त्यभिधानं स्फुटं प्रतीयते ततः कारणादविभक्तविभक्तियुजः अभिन्नविभक्तियुक्तस्यास्य
शरीरभृतो जीवस्य मन आदिवदनृतता कथं न भवेत् मिथ्यात्वं भवत्येव जीवस्यानृतत्वे तस्यापि विकृतत्वं ब्रह्मा
त्मकत्वश्रुतिसिद्धं न संस्यतीत्यर्थः ॥६०॥ न ब्रह्मसामानाधिकरण्यमनृतत्वप्रयोजकमित्याह सिद्धांती

ननु जीवसतोरपि तत्त्वमिति स्फुटमेकविभक्त्यभिधानमिदं ॥ कथमस्य शरीरभृतो
नृतता न भवेदविभक्तविभक्तियुजः ॥६०॥ प्रकृतेरभिधानपदेन यथा विकृतेरभि
धानमुपेति युजां ॥ अनृतत्वमतिस्तु तथा विकृतौ मृदयं घट इत्यभिधासु यथा ॥६१॥

रि॰ प्रकृतेरिति यथा प्रकृतेरभिधानपदेन कारणवाचकपदेन विकृतेरभिधानं कार्यवाचकं पदं युजामुपे
ति सामानाधिकरण्यं प्राप्नोति तथा विकृतावनृतत्वमतिर्भवति कार्ये मिथ्यात्वबुद्धिर्भवति तत्र दृष्टां
तमाह मृदयमिति मृदयं घटः तंतुरयं पटः कनकमिदं रुचकमिति कार्यकारणपदयोः समाना
धिकरणे कार्ये अनृतत्वमतिर्भवति तद्वदत्रापि यदि जीवपरयोः कार्यकारणभावः स्यात्तर्हि अनृतत्वं भवे
देव न तु तदस्तीति सिद्धांतिनोऽभिप्रायः ॥६१॥

ननुब्रह्ममनसोःप्रकृतिविकृतिभावान्मृत्करकयोरिवतादात्म्यापदेशोवस्तुपरएवकस्मान्नभवतीत्याशंक्याह
करकेति यथाकरकःघटादिकंकार्यंस्वकारणान्मृदःसकाशात्पृथङ्नास्ति तथामनआदित्यादिकमपिकार
णभूतात्सतः।ब्रह्मणःसकाशात्पृथग्व्यतिरिक्तं तयानास्तीत्येवंवस्तुसतत्त्वकतानुवस्तुपरतानुयथात्वयाभ्यु
पगम्यते।तथामनोब्रह्मेत्युपासीतेत्यस्मिन्वाक्येविधिशब्दइतिश्रवणंवृथाभवेत्।तस्मान्मनोब्रह्मेत्यादिवाक्यस्यव

करकोनमृदःपृथगस्तियथामनआदिसतोस्तितथानपृथक्।इतिवस्तुसतत्त्वक
तानुयदाविधिशब्दइतिश्रवतयातुवृथा॥५८॥मनआदिसमानविभक्तितयाविधि
शब्दमितिंचविहाययदि।जनकेनसतासहयोगमियादनृतंनदितिस्फुटमुक्तमभू
त्॥५९॥

स्तुपरत्वमयुक्तंकिंतूपासनापरत्वमेवेत्यर्थः॥५८॥ननुविधिशब्दमितिंचविहायमनोब्रह्मेत्यादिद्वयंपद
समानविभक्तितयासामानाधिकरण्यंगमिष्यतीति तच्चवस्तुपरत्वमेवेतितत्राह मनेति॥समानविभक्ति
तयाएकविभक्तितयामनआदित्यादिकंविधिशब्दमितिंचविहायजनकेनसतास्वकारणेनब्रह्मणास
हयोगमियात्सामानाधिकरण्यंगच्छेद्यदितर्हितन्मनआद्यनृतमसत्यमितिस्फुटंत्वयोक्तमित्यभूदिदा
नींमनआदिजगन्मिथ्येतितवसिद्धांतःस्यात्तदयुक्तंतवापसिद्धांतप्रसंगादित्यर्थः॥५९॥ ५९

12

सं० सार ९७

जीवस्यब्रह्मविकारत्वंश्रुतिषुप्रसिद्धंनचेत्किमात्मकत्वंतर्हिप्रसिद्धमित्यपेक्षायामविकृतब्रह्मात्मकत्वमे
वेत्याह सिद्धांती । यदेति तदेहिततत्त्वे ज्ञोसृजतसर्वमीक्षांचक्रे सत्यंज्ञानमनंतंब्रह्मप्रज्ञानंब्रह्मविज्ञान
मानंदंब्रह्मेतिश्रुतेरीक्षणविग्रहकंयदक्षरात्मकंब्रह्म अंबरपूर्वकमाकाशपुरःसरकमिदंजगदजी
जनदुत्पादयत् । तदेवाक्षरात्मकंब्रह्मैवस्वकृतंजगत्प्रविवेशप्राविशत् । यस्मादेवंतस्मात्सपरमात्मै
वजीवसमाख्यः जीवसंज्ञांप्राप्तइतिनत्सृष्ट्वा तदेवानुप्राविशदित्याद्याश्रुतयःप्रवदंतीत्यर्थः । एवंश्रुति
प्रमाणाज्जीवस्याविकृतब्रह्मात्मकत्वेसिद्धेप्रकृतेकिमायातमित्यपेक्षायांजीवएवपरमात्मेत्यनेनहेतु

यदजीजनदंबरपूर्वमिदंजगदक्षरमीक्षणविग्रहकं । प्रविवेशतदेवजगत्स्वकृतंसच
जीवसमाख्यइतिश्रुतयः ॥ ९४ ॥ परमात्मविकारविभक्तमतिर्नभवत्यतएवशरीरभृतःप्र
तएवविकारविभिन्नमतिर्नभवत्यतएवमृषात्वमतिः ॥ अविभक्तविभक्त्यभिधानकृता
९५

नाविभक्तबुद्धिर्नभवेदित्यायातमित्याह । परमात्मेति । अतएवाविकृतब्रह्मात्मकत्वादेवास्यशरीरभृतःप
रमात्मविकारविभक्तमतिर्नभवतिपरमात्मविकारत्वेनब्रह्मकार्यत्वेनहेतुनाब्रह्मणःसकाशाज्जीवोवि
भक्तइतिबुद्धिर्नभवतिजीवस्यब्रह्मकार्यत्वाभावादित्यर्थः । [illegible] ततःकिंतवसिद्धमित्यत्राह । यतएवेतिसा
र्द्धश्लोकेनयतोति । यतएवविकारत्वेनविभ[illegible]न्नमतिर्नभवत्यतएवेहतत्त्वमसिप्रभृतौ नत्वमस्यादिवाक्ये
शरीरभृतःपरमात्मपदेनअविभक्तविभक्त्यभिधानकृतामृषात्वबुद्धिर्नभवेद्ब्रह्मसामानाधिकरण्येसतिजी
वेऽनृतत्वबुद्धिर्नभवेदित्यत्रव्यतिरेकदृष्टांतमाह । लवणमिति । यथालवणजलयोःकार्यकारणभावाज्जलकार्यस्यल

ननु कार्यकारणयोः समानाधिकरण्ये कार्येऽनृतत्वमतिर्भवतु मनआदेस्तु सच्चित्प्रकरणे कार्यत्वाश्रवणादनृ
तत्वं न भवेदित्याशंक्यमेवं तत्त्वबाधियोदित्याह सिद्धांती विकृतीति ॥ एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च
अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मन इत्यादि
श्रुतिषु मनः प्रभृतेर्मनः प्रमुखस्य जगतः बहुशः बहुवारं सतः प्रकृतेर्विकृतित्वमवादि मनसः सद्रूप
ब्रह्मकार्यत्वमभाणि यत एवमतः कारणात्समानविभक्तितया मनआद्यनृतमिति सुवेद्यं मनआदेः कार्यत्व
श्रवणाद्ब्रह्मसामानाधिकरण्ये मनआद्यनृतं भवेदित्यर्थः ॥ ६२ तर्हि जीवस्यापि मनआदिवद्ब्रह्मकार्यत्वश्र

विकृतित्वमवादि मनःप्रभृतेर्बहुशः श्रुतिषु प्रकृतेस्तु सतः ॥ अत एव समानविभक्तित
या मनआदि सुवेद्यमसत्यमिति ॥ ६२ ॥ जनितत्वमवादि न हि श्रुतिभिर्जनकेन सतास्य श
रीरभृतः ॥ मनआदिविकारविलक्षणतां प्रतियंति शरीरभृतस्तु सतः ॥ ६३ ॥

वणादनृतत्वं कुतो न भवेत् ॥ यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः ॥ सर्वे प्राणाः ॥ सर्वे देवाः स
र्वे लोकाः सर्वे वेदाः सर्वाणि भूतानि सर्व एत आत्मनो व्युच्चरंतीति जीवोत्पत्तिश्रवणादित्याशंक्य जीवस्य स्वरू
पोत्पत्तिर्न भवति किंतु विशिष्टोत्पत्तिरेवेत्यभिप्रायेणाह सिद्धांती ॥ जनीति ॥ अस्य शरीरभृतः शरीरोपाधिकस्य
जीवात्मनो जनकेन सता निखिलजगत्कारणेन ब्रह्मणा जनितत्वमुत्पादितत्वं श्रुतिभिर्नावादि न गदितं
हि यस्मात् कारणाच्छरीरभृतो मनआदिविकारविलक्षणतां मनआदिकार्यविलक्षणत्वं विद्वज्जनाः प्रति
यंति जानंति तस्मान्मनआदिवज्जीवस्य ब्रह्मसामानाधिकरण्ये अनृतत्वं न भवेदित्यर्थः ॥ ६३ ॥

देवं ततः २

B

श्रु०सार इदानींपरमार्थभेदनिराकरणासंभवंसाधयति॥इहेति इहव्यवहारदशायांयस्यपदार्थस्ययोगुणस्वतएवात्मनः
१८ जातुपरतोनभवेत्तस्यस्वाभाविकगुणस्यवचनेननिराकरणंनक्रियतेनिराकर्तुंनशक्यइत्यर्थः॥कुतोनशक्यइ
त्याकांक्षायांतत्रहेतुंकथयति सहजइति सभेदाख्योगुणः सहजोयतउपाधिकृतोनभवेद्यतस्ततः कारणाद्वच
नेननिराक्रियतइत्यर्थः॥६९॥ ननुवचनेनकिमितिसहजगुणनिराकरणंनसंभवतिवचनस्यकारकत्वादित्यत्राह
वचनमिति अज्ञातार्थाधिगंतृतयाप्रमाणभूतंतत्त्वमस्यादिवचनमववोधकमेवप्रमाणानामभिव्यंजकत्व

इहयस्यचयोगुणआत्मगतःस्वतएवनजातुभवेत्परतः॥वचनेननतस्यनिराक
रणंक्रियतेसगुणःसहजस्तुयतः॥६९॥वचनंत्ववबोधकमेवयतस्ततएवन
८ वस्तुविपर्ययकृत्॥नहिवस्त्वपिशब्दवशात्स्वकृतिंप्रजहात्यनवस्थितिदोषभयात्॥

स्वाभाव्यादतोयथावस्थितप्रत्यग्ब्रह्मैकत्वबोधकमेवनतुकारकमित्यर्थः॥तर्हिवस्तुस्वयमेवशब्दसामर्थ्यात्त
स्वभावसिद्धंगुणंपरित्यजतीतिचेन्नेत्याह नहीति॥वस्त्वपिशब्दवशाच्छ्रुतिसामर्थ्यात्स्वकृतिंसिद्धगुणंभेदं
नजहातिनपरित्यजतिकुतःकारणादित्यतआह॥अनवस्थितीति॥स्वस्यानवस्थानदोषभयात्सहजस्य
निराकरणेस्वस्यनाशप्रसंगादित्यर्थः॥तथोक्तंसुरेश्वराचार्यैः॥नहिस्वभावोभावानांव्यावर्तेतौष्ण्यवद्र
वेः॥स्वभावाद्भिन्नतोर्थोनिःस्वभावःस्वपुष्पवदिति॥तस्माद्ब्रह्मस्वरूपस्यसहजत्वात्तस्यनिवृत्तिर्नसंभवतीत्यर्थः॥७०

ब्रह्मसमानाधिकरण्येऽपि स्वात्वं न भवतीति साधयितुं जीवस्य विकारत्वनिराकृतं अत एव जीवस्य सर्वप्रकारे
ण ब्रह्मविलक्षणता निराकृतेत्याह सिद्धान्ती परेति अस्य शरीरभृतः ॥ परमात्मविकारनिराकरणं कृतमिति
यतः अत एवास्य शरीरभृतो जीवपदार्थस्य परमेश्वररूपविलक्षणता मनागपीषदपि नास्ति जीवस्याविकृत
ब्रह्मैकत्वश्रवणादित्यर्थः ॥६६॥ यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति ॥ नेह नानास्ति
किंचनेति भेदस्य निरस्तत्वाज्जीवपरयोरीषदपि भेदो नास्तीत्युपश्रुत्य पूर्वपक्षवादी चोदयति ॥ नन्विति ॥ जीवप
रयोरणुमात्रमपि स्वगते विशेषणं यदा भेदकं नास्ति तत्त्वमसीति वचनं किमु वक्ति बोधयति एयत इत्यपि च

परमात्मविकारनिराकरणं कृतमस्य सरीरभृतस्त्वयतः ॥ परमेश्वररूपविलक्षणता न मनाग
पि देहभृतोऽस्ति ततः ॥६६॥ ननु जीवसतोरनुमात्रमपि स्वगतं न विशेषणमस्ति यदा ॥ वदत्व
मसीति तदा वचनं किमु वक्ति तथैयत इत्यपि च ॥६७॥ स्वगतं यदि भेदकमिष्टमभूदनुमात्रमपी
श्वरदेहभृतोः परमेतुमशक्यमभेदवचनैरमुनास्य पृथक्कनिषेधपरैः ॥६८॥

एष त आत्मान्तर्याम्यमृत इति वचनं किमु वक्ति जीवपरयोरीषदपि भेदाभावे पूर्वमेवाभेदस्य सिद्धत्वादुपदेशा
नर्थक्यमिति पूर्ववादिनोऽभिप्रायः ॥६७॥ एतच्चोद्यं परिहरति सिद्धान्ती स्वगतमिति ईश्वरदेहभृतोरणुमात्र
मपि स्वगतं भेदकमिष्टमभूद्यदि जीवपरयोः परमार्थतः स्वगतभेद इष्यते यदि तर्हि तं भेदकममुना
परमात्मना जीवस्य पृथक्त्वनिषेधपरैस्तत्त्वमस्यादिवाक्यैरपनेतुं निराकर्तुमशक्यमिति जीवपरयोः
परमार्थभेदाङ्गीकारे तस्य वचनेन निराकरणमशक्यमित्युक्तं ॥ ६८ ॥

स०सार नन्वेवमपितत्वमसिवाक्यस्यपुरुषार्थहेतुत्वमनुपपन्नंमहताप्रयत्नेनाऽहर्निशंतत्वमसिवाक्यमसकृच्छ्रुतवता
२३ मप्यस्माकमनर्थहेतुत्वज्ञाननिवृत्तेरदर्शनादित्याशंक्यपापाच्छन्नबुद्धीनांकुतार्किकाणामेवैतत् ननुभगवद्भक्तानांप
रमहंसानांतेषांक्षीणकल्मषत्वात्सकृच्छ्रवणादप्यनुभवपर्यंतज्ञानोदयसंभवादित्यभिप्रायेणाहसिद्धांतीविनि
वर्तेतेति यस्मादधिकारिणःप्रमितिजनकोवेदस्तस्मात्तत्वमसिअयमात्माब्रह्मएषतआत्मासर्वांतरइतिप्रज्ञानं
ब्रह्मेत्यादिमहावाक्यैर्येनयदाशिष्यत्वेनाभिमतःपुरुषःएवंप्रतिबोध्यतेनासिलंदेहेंद्रियमनःप्राणाहंकार
संघातस्तेषांघटादिवद्दृश्यत्वान्नापिसंसारीत्वयिप्रतीयमानस्यसुखदुःखादेरंतःकरणोपाधिनिबंधनत्वात्किं
तर्हिस्वरूपंयत्सर्ववेदांतप्रतिपाद्यमद्वयंसदानंदप्रत्यग्बोधरूपंवस्तुतदेवत्वमितिपरमकारुणिकेनगुरुणाप्रति

विनिवर्ततएवशरीरगताविपरीतमतिःपुरुषस्यतदा।वचनेननतुतत्वमसीतियदाप्रतिबोध्य
तएवनइत्यपिच॥२१॥यदिनापनयेच्छ्रुतिरात्ममतिंपुरुषस्यशरीरगतामनृतां।तदहंमतिहेतु

बोध्यतेतदैवोत्तमाधिकारिणःशिष्यस्यशरीरगताविपरीतमतिर्विनिवर्ततएवानात्मन्यात्मबुद्धिर्निवर्ततेतस्माद्वा
क्याजनितज्ञानेनतत्कार्यनिवृत्तौनिरतिशयानंदाविर्भावलक्षणस्यप्रयोजनस्यविद्यमानत्वाद्वस्तुपरत्वे
वाक्यस्यपुरुषार्थपर्यवशायित्वमस्त्येवेत्यर्थः॥२१॥यदितत्वमसीतिवाक्यमज्ञाननिवर्तकंनभवेत्तर्हिजननमर
णादिलक्षणःसंसारोदुर्निवार्यःस्यादि[illegible]तिपक्षेदूषणमाह॥यदीति॥पुरुषस्यश
रीरगतामनृतामात्ममतिंनापनयेद्यदिअनात्मबुद्धिंननिवर्तयेद्यदितर्हिसुखदुःखफलामहंमतिहेतुकस्यक
र्मणस्तिर्यगादिप्राप्तिरूपामवशोनुभवेत् तस्माद्वाक्यजनित[illegible]नेननिवर्त्यमविद्यायांतत्कार्यस्यसंसारस्यापि
निवृत्तिसंभवाद्वाक्यस्याखंडैकरसवस्तुपरत्वेनिरवद्यपुरुषार्थसाधनत्वंसंभवति॥२२॥

पुनरविधिपदाध्याहारो न युक्त इत्यत्र हेत्वंतरमाह ॥ श्रुतेति ॥ इह विधिपदाध्याहारपक्षे त्वयमपि महान्दोषः स्यात् ॥ श्रुतिहानिः यथाश्रुतार्थपरित्यागः अश्रुतकल्पनि रपि अश्रुतार्थकल्पना श्रुतिवित्सम्मयो न भवेत् वेदार्थविदां सिद्धांतेनापि पतेत् ॥ यत एवमतः ॥ कारणात् ॥ श्रुतिभक्तिमता श्रुतौ गौरवात् श्रुतिवक्रगतं श्रुतिमुखादृष्टं यत्तदेव ग्रहणीयं न तु बुद्धिवशात्स्वमनीषया किंचिदपि कल्पयितव्यमित्यर्थः ॥ ८९ ॥ एवं तावत्तत्त्वमसिवाक्ये विधिपदाश्रवणाद्विपदाध्याहारस्य चान्याय्यत्वाद्वाक्यमुपासनाविधिपरं न भवेत् ॥ किं त्वखंडैकरसवस्तु

श्रुतिहानिरिहाश्रुतकल्पनापि श्रुतिवित्सम्मयो न भवेन्नु यतः ॥ श्रुतिभक्तिमता श्रुतिवक्रगतं ग्रहणीयमतो न तु बुद्धिवशात् ॥ ८९ ॥ पुरुषस्य शरीरगतात्ममतिं मृतिसंभवहेतुमनर्थकरीं ॥ अपनीय सदात्ममतिं दधती महते पुरुषस्य हिताय भवेत् ॥

परमिति साधितं तच्चेदमाशंक्यते तत्त्वमसिवाक्यस्य वस्तुपरत्वे वस्तुनो हानोपादानाविषयत्वात्पुरुषार्थरहितं वाक्यं प्रसज्येत विधिपरत्वे तु पुरुषप्रवृत्तिः प्रयोजनं प्रयोजनस्य प्रवृत्तिनिवृत्तिसाध्यत्वादिति [redacted]
तन्मिति सिद्धार्थवादिनो मन्यंते वस्तुपरत्वे तु अशेषानर्थमूलाज्ञाननिवृत्तिः प्रयोजनं प्रयोजनस्य प्रवृत्ति
निवृत्तिसाध्यत्वादिति तदयुक्तमिति सिद्धार्थवादिनो मन्यंते वस्तुपरत्वे तु अशेषानर्थमूलाज्ञाननिवृत्तिः परमपुरुषार्थो विद्यत एवेत्याह ॥ पुरुषेति ॥ पुरुषस्यानेकानर्थकरीं मृतिसंभवहेतुं शरीरगतात्ममतिमपनीय पुरुषस्य जीवस्य सदात्ममतिं दधती श्रुतिः महते हिताय भवेत् ॥ वाक्यजन्यज्ञानस्य मोक्षहेतुत्वादित्यर्थः ॥ १०

क्रू०सा लक्षणब्रह्मप्राप्तिरुपासनाफलं न संभवेदित्युक्तमिदानीं यदि पुनरभिनिविवेशमात्रेण ब्रह्मप्राप्तिरेवोपासनाफलं कल्प
२७ येत र्हि जीवस्य स्वरूपहानिरत्यंतविरुद्धस्वभावयोरैक्यासंभवादित्याह सिद्धांती ॥ यदीति ॥ एष देहभृज्जीवः सदुपासन स्म
यासदात्मकतां प्रगमिष्यति यदि तर्हि सो जीवः ॥ निजं मर्त्यस्वभावं न जिहास्यतीति न किं तु प्रजिहास्यत्येवात्र हेतुः
यत इति ॥ उभयोरत्यंतविलक्षणयोर्विरुद्धस्वभावत्वादैक्यगतिर्न भवति एकत्वलक्षणफललोभी कोऽपि मर्त्यलक्षण
याः प्रकृतेः ॥ परित्यागासंभवात्तत्परित्यागे च स्वरूपस्य नाशप्रसंगाज्जीवस्य ब्रह्मत्वापत्तिरुपासनाफलमिति नव
क्तुं मर्त्यस्वभावापरित्यागे च अन्यस्यान्यात्मकतायोगादुभयथापि ब्रह्मप्राप्तिरूपासनाफलं भवेदित्यर्थः तदु

यदि देहभृदेष सदात्मकतां प्रगमिष्यति वै सदुपासनया ॥ न जिहास्यति रूपमसौ
हि निजं यत ऐक्यगतिर्न भवत्युभयोः ॥९४॥ रसविद्धमयः प्रकृतिं सहजां प्रविहा
य यथा कनकत्वमियात् ॥ पुरुषोऽपि तथा सदुपासनया प्रतिपत्स्यत एव सदात्म कतां ९५

क्तं श्रीमच्छंकराचार्यैः नान्यदन्यद्भवेद्यस्मान्नान्यदन्यस्या[illegible]गादुभयथापि ब्रह्मप्राप्ते हि चिंतयेत् अन्य
स्यान्यात्मभावे हि नाशस्तस्य ध्रुवो भवेत् ॥९५॥ ननु स्वरूपनाशेन विनापि लोके रसविद्धस्य अयसः कनकत्व
प्राप्तिर्दृष्टा तद्वदत्रापि मर्त्यस्वभावविनाशेऽपि जीवस्वरूपविनाशमंतरेण ब्रह्मत्वापत्तिः ॥ फलं भवत्विति चोदय
ति पूर्ववादी रसविद्धेति रसविद्धमयः स्वनाशमंतरेण सहजां प्रकृतिमयस्त्वं प्रविहाय कनकत्वं यथेयात् प्राप्नु
यात्तथा पुरुषोऽपि सदुपासनया अहं ब्रह्मास्मीति संततोपासन[illegible]मंतरेण सहजं मर्त्यत्वं प्रविहाय सदात्मक नाश
तां ब्रह्मात्मकतां प्रतिपत्स्यत एवेति यस्माद्वाक्यजनितसम्यग्ज्ञानमंतरेणापि सदुपासनकर्मणैव जीवस्य ब्रह्म
त्वप्राप्तिः संभवतीति चोद्यवादिनोऽभिप्रायः ॥९६॥

एवं वाक्यस्य वस्तुपरत्वे निरवद्यफलत्वमुपपाद्य विधिपरत्वे तु वाक्यस्य फलाभावं दर्शयति । यदीति । तत्त्वमसीति व
देद्वचनं सदुपास्वेति सदुपासनलक्षणं कर्म वदेद्यदि न तत्त्वमतीति जीवपरयोरेकत्वं बोधयेद्यदि तर्हि ब्रह्मोपासकस्य
पुरुषस्य सदुपासनतः कीदृक्फलं भविष्यतीति विमृशामि उपासनपरत्वेन किंचिदपि फलं भविष्यतीत्यर्थः ९३
ननु किमत्र विमर्शनेन ब्रह्मोपासकस्य ब्रह्मणेऽत्यंतभिन्नस्यापि ब्रह्मणैकत्वापत्तिरेव फलं भविष्यतीत्याशं

यदि तत्त्वमसीति वदेद्वचनं सदुपासनकर्म न तत्त्वमतिं । पुरुषस्य फलं सदु — जनयेत्
पासनतो विमृशामि भविष्यति कीदृगिति ॥ ९३ ॥ पुरुषस्य तु मर्त्यगुणस्य भवेत्
सदुपासनया न सदात्मकता न कथंचिदपि प्रजहाति यतः प्रकृतिं सहजामि
ह कश्चिदपि ॥ ९४ ॥

क्याह । पुरुषेति । मर्त्यगुणस्य परमार्थतो मर्त्यधर्मयुक्तस्य पुरुषस्य सदुपासनया सदात्मकता न भवेत् सद्रूपब्र
ह्मणैकत्वापत्तिरेव फलं भविष्य प्राप्तिर्न भवेत् । तत्र हेतुमाह । न कथंचिदपीति । इह कश्चिदपि सहजां निजसिद्धां
प्रकृतिं स्वभावं न जहाति न परित्यजतीति यतः । अतः कारणात् सदुपासनया सद्रूपप्राप्तिर्न भवेदित्यर्थः ॥ ९४ ॥
उपासनापरत्ववादिमते बंधस्य सत्यत्वाभ्युपगमादात्मनो मर्त्यस्वभावस्याग्न्यौष्ण्यवन्निवृत्त्यसंभवादमृतत्व

प्र०सा २५ एवमनस्यान्यात्मकत्वस्य भ्रांतिमात्रत्वात्परमार्थतोऽनस्यान्यात्मकत्वासंभवात्मर्त्यस्वभावस्य सदुपासनकर्मणामृतत्वलक्षणब्रह्मप्राप्तिर्न संभवतीत्युक्तं अथेदमाशंकते अमृतत्वं नाम प्रागविद्यमानमेवोपासनाकर्मसाध्यं भविष्यति यागादिसाध्यस्वर्गादिसाध्यस्वर्गादिफलवदित्यत्राह सिद्धांती ॥ अमृतत्वमिति यजिवत् यागादिवदसदेवामृतत्वं पुरुषस्य सदुपासनया क्रियते संपाद्यते यदि तर्हि यजिकार्यवत्स्वर्गादिवदंतवदेव भवेत् तत्र हेतुमाह ॥ कृतकस्येति कृतकस्य कार्यस्याध्रुवताऽनित्यता स्वर्गादिफलवदिति विज्ञाना तद्यथेह कर्मचितो लोकः क्षी-

अमृतत्वमसत्पुरुषस्य यदि क्रियते सदुपासनया यजिवत् ॥ यजिकार्यवदंतवदेव भवेत्कृ-
तकस्य यतो विदिताध्रुवता ॥१००॥ पुरुषस्य सतश्च विधर्मकयोः ॥ सदुपासनया न भवेत्सम-
तिः ॥ यदि संगतिरिष्यत एव तयो रविमुक्ततया न चिरं वसतः ॥१०१॥

यते एवमेवामुत्र पुण्यचितो लोकः क्षीयते ॥ यद्भाववत्वे सति कृतकं तदनित्यं यथा घटादिरिति श्रुत्यनुमाना-भ्यां सिद्धं कृतकस्यानित्यत्वं तस्मादमृतत्वस्य क्रियया साध्यत्वे तस्य विनाशित्वमवश्यं भवेदित्यर्थः ॥१००॥ ननु यागसाध्यस्वर्गादिवत्तन्मात्रसदुपासनाफलं जीवब्रह्मणोः संयोगाख्यं फलं भविष्यतीत्याशंक्याह पुरुषेति वि-धर्मकयोः संसारित्वासंसारित्वादिविधर्मकयोः पुरुषस्य सतश्च तयोरुभयोः ॥ सदुपासनया ब्रह्मोपासनकर्मणा समितिः संगतिर्न भवेत् विपक्षे दोषमाह यदीति तयोः संगतिरिष्यते यदि तर्हि विमुक्ततया संयुक्ततया चिरं न वसतः संयोगा विप्रयोगांता इति न्यायात् उपासनाय स्वरूपैक्ये विनाशरहितं फलं नास्तीत्यर्थः ॥१०१॥ तं

क

एषदृष्टांतो विद्वत्संप्रतिपन्नो न भवति अयसः कनकत्वस्य भ्रांतित्वादिति परिहरति सिद्धांती ॥ अयस इति अयसोव
यवाननभिभूय आच्छाद्य स्थितवान् रसः ॥ अनलानुगृहीतिमनु अग्नेः प्रक्षेपणानंतरं दनुग्रहवत्वादयसि लोहे के
वलं कनकत्वमतिं जनयति भ्रांतानां तत्र स्वर्णबुद्धिमुत्पादयति ॥ अयसस्तु पुनः कांचनतां न प्रतिपन्नं नयत्यन्नमित्यर्थः २७
एतमेवार्थं दृष्टांतेन स्पष्टयति ॥ उदकेति यथा पयो दुग्धं चूदकावयवाननभिभूय आच्छाद्य उदके विपरीतमतिं क्षीर
मितिमतिं जनयति यथा कनकमपि रजतावयवाननभिभूय आच्छाद्य रजते कनकत्वमतिं जनयति ॥ तथा रसोप्यय

अयसोवयवाननभिभूय रसः स्थितवाननलानुगृहीतिमनु ॥ कनकत्वमतिं जनयत्यपसि प्रतिपन्नम
यो न तु कांचनतां ॥ ९७ ॥ उदकावयवाननभिभूय पयो रजतावयवाश्च यथा कनकं ॥ विपरीतमतिं जन
यत्युदके रजते च तथायसि हेममतिं ॥ ९८ ॥ रसवीर्यविपाकविनाशमनुप्रविनश्यति कांचनताप्ययं
सः कृतकं हि न नित्यमिति प्रगतं समवेतमवश्यमपेतितयतः ॥ ९९ ॥

वाननभिभूयायसि हेमबुद्धिं जनयति हेममतिं केवलं जनयति न तु हेमं करोति यस्मादेवं तस्मादयसः कांचनत्व
भ्रांतिगृहीतामित्यर्थः ॥ ९८ ॥ इतश्चायसः कांचनत्वं भ्रांतिमात्रं रसवीर्यविपाकनाशे कांचनप्रतीत्यभावात्तद्भावस्यागंतु
कस्यावश्यं वस्त्रादिवदनित्यत्वात् ॥ अमुमादित्याह ॥ रसेति ॥ अयसः कांचनतापि रसवीर्यविपाकविनाशमनु रसवी
पाकस्य विनाशमनुप्र रसवीर्यविपाकः विनश्यति रसवीर्यविपाकस्य नाशे कांचनत्वप्रतीतिरपि विनश्यति तत्र हेतुं क
थयति समवेतमिति समवेतं कार्यमवश्यमपेति विनं ह्यतीति यतस्तत्र व्याप्तिं दर्शयति ॥ कृतकं हीति कृतकं कार्यमु
द्भूतं वस्तु नित्यं न भवतीति प्रगतं वस्त्रादौ प्रसिद्धमिति यस्मादयसः ॥ कांचनत्वं भ्रांतिसिद्धमित्यर्थः ॥ ९९ ९९ ९९

श्रु॰ सा॰ एवं तत्त्वमसिवाक्यस्यैवैकैकरसवस्तुपरत्वमुपपादितमिदानीं सर्वशाखोपनिषद्गतानि महावाक्यान्यप्यनयैव
२६ दिशायोजयितव्यानीत्याह॥ सकलइति॥ शरीरभृतो जीववाचकं पदं कस्य परमात्मपदैकविभक्तितया परमात्मवाच
कपदेनैकविभक्तितया सामानाधिकरण्येन सकलोपनिषत्सु विद्यमानानि यान्युपदेशवचांसि एकत्वप्रतिपाद
कानि वाक्यानि तान्यपि मतिमानुपनिषदां शक्तितात्पर्यज्ञः॥ अनयैव दिशा उक्तेन मार्गेण यथा तत्त्वमसिवाक्य
स्य गुणवादस्तुतिविपरीतबोधकत्वोपासनापरत्वनिरासेन जीवपरयोरेकत्वमुपपादितं तथाभियुक्ततया प्रमाणे

सकलोपनिषत्सु शरीरभृतः परमात्मपदैकविभक्तितया॥३॥ उपदेशवचांस्यनयै
व दिशा गमयेन्मतिमानभियुक्ततया॥४॥ द्रविडोपि च तत्त्वमसीति वचो विनि
वर्तकमेव निरूपितवान्॥ शबरेण विवर्धितराजशिशोर्निजजन्मविदुक्तिभिद
र्शनतः॥५॥

र्गमयेदुन्नयेदित्यर्थः॥४॥ संप्रदायवचनमप्यत्र प्रमाणमित्याह॥ द्रविडोपीति द्रविडाचार्यश्चोपदेशसाहस्र्यां
श्रुतिस्तत्त्वमसीत्याह श्रोतुर्मोहापनुत्तये इत्यादिना तत्त्वमसीति वचस्तत्त्वमसिवाक्यमज्ञानस्य निवर्तकमेवे
ति निरूपितवान् तत्र दृष्टान्तं दर्शयति॥ शबरेणेति॥ कुतश्चित्कारणाद्दूरं प्राप्तस्य शबरेण विवर्धितस्य राज
शिशोः राजपुत्रस्य निजं जन्म वेत्तीति निजजन्मविद्युः॥ शबरस्तस्योक्तिर्यथा राजपुत्रस्य राजपुत्रत्वाज्ञा
ननिवर्तिका तन्निदर्शनतस्तद्दृष्टान्तेन तत्त्वमसिवाक्यस्याज्ञाननिवर्तकत्वं निरूपितवानित्यर्थः॥१०५॥

मोक्षस्यचतुर्विधक्रियाफलविलक्षणत्वादुपासनाख्यंकर्ममोक्षसाधनंभवेदित्याह ॥ फलमिति ॥ सदुपासनतःब्र
ह्मोपासनतः ब्रह्मोपासनकर्मणा पुरुषस्योपासकस्येदृशमेवफलंभविष्यति अतोन्यन्नित्यंनास्तियद्यन्यत्फलं
कल्प्येततदपिफलंनिरवद्यतयानिर्दुष्टतयाविदुषांनाभिमतंकुतोनाभिमतमित्यत्राह ॥ बहुदोषसमीक्षणतइति
साधनसाध्यस्यसर्वस्यानित्यत्वजडत्वादिदोषदर्शनादित्यर्थः ॥ १०२ ॥ एवंतातत्त्वमसीवाक्यस्योपासनाविधिपरत्वेस
मीचीनफलाभावादुपासनापरत्वमयुक्तमित्युक्तमिदानींकिंतर्हियुक्तमित्यपेक्षायांयथावस्थितवस्तुबंधक

फलमीदृगिदंसदुपासनतः पुरुषस्यभविष्यतिनान्यदतः ॥ नचतन्निरवद्यतया
भिमतंविदुषांबहुदोषसमीक्षणतः ॥ २ ॥ यदुपासनकर्मविधानपरंनभवेदत
एवहितद्वचनं ॥ अहमस्मिशरीरमिदंचममेत्यविवेकमतिंविनिवर्त्तयति ॥ ३ ॥

तयाअज्ञाननिवृत्तिद्वारेणमोक्षसाधनत्वमेवेत्याहसिद्धांती ॥ सदुपासनेति ॥ अतएवोपासनापरत्वेनिर्विघ्नफला
भावादेवतद्वचनंतत्त्वमसिवाक्यंसदुपासनकर्मविधानपरंनभवेत्तर्हितद्वाक्यंकिंपरमित्यत्राह ॥ अहमस्मी
ति इदंशरीरमहमस्मिमनुष्योहंब्राह्मणोहं क्षत्रियोहंव्रतीग्रहीसंन्यासीतिशरीरादिष्वहंबुद्धिमिदंशरीरंम
दीयमितिशरीरगतात्मीयबुद्धिंचनिवर्तयति ॥ आत्मानात्मविवेकतया आत्मज्ञानमुत्पादयतीत्यर्थः ॥ १०३ ॥

18

क्र॰सार इदानीं त्वंपदार्थशोधनाय जागरितावस्थां दर्शयति करणेति ॥ मतिः करणानींद्रियाणि विषयाभिमुखं यदा नवं तित
२७ हाप्रगमय्य प्रापयित्वा मतिर्विषयेषु चरेदिति यत्तद्बुधाः जागरितं प्रवदंति दृशेः दृग्रूपस्य स्वयंप्रभस्य ममतज्जा
गरितं नास्तीत्यवगच्छ जानीहीत्यर्थः ॥ ८ ॥ इदानीं स्वप्नावस्थां दर्शयति करणानीति जाग्रत्स्थितिनिमित्तकर्मक्ष
ये यदा करणानींद्रियाणि उपरतानि बाह्यविषयेभ्यो विनिवृत्तानि तदा बाह्यविषयेण विना केवलं विषयानुभवादितवा
सनया अनुभवजनितसंस्कारमात्रेण विषयप्रतिमं स्फुरणं स्वप्नं प्रवदंति बुधा उपसंहृतकरणस्य जाग्रद्वास

अमनस्कमध्येकमनिंद्रियकं विरजस्कमसत्वतमस्कमपि अमदीजलवह्न्यनिलांबरकं परमहत्परमात्म
तयाश्रयमो ॥ ५ ॥ करणानि हि यद्वि विषयाभिमुखं प्रगमय्य मतिर्विषयेषु चरेत् ॥ तद्धि जागरितं प्रवदंति बुधा
नतं दृशि ममेत्यवगच्छ दृशेः ॥ ८ ॥ करणानि यदोपरतानि तदा विषयानुभवाहितवासनया विषयेण वि
ना विषयप्रतिमं स्फुरणं स्वपनं प्रवदंति बुधाः ॥ १० ॥ करणस्य धियः स्फुरणेन विना विषयाकृतिकेन तु या

नानिमित्तं तथाविधं हस्त्यश्वरथादिविषयं ज्ञानं स्वप्नमित्यर्थः ॥ ९ ॥ इदानीं सुषुप्त्यवस्थां दर्शयति करणेति ॥ कर
णस्य धियः अंतःकरणरूपाया बुद्धेर्विषयाकृतिकेन विषयाकारेण स्फुरणेन विना या स्थितिस्ता अस्मिंनि
र्विषयां स्थितिं सुषुप्तिं प्रवदंति बुधाः कीदृशाः विनिवृत्ततमसः ॥ विनिवृत्ता आरोपितस्य निषेधत्वे दृष्टानुश्राविक
विषयेभ्यो निवृत्तास्तदृष्टतृष्णा येषां ते विनिवृत्ततृष्णः ॥ एवं गुणत्रयरहितः परमहंसाः ॥ सत्यं ज्ञानमनंतं ब्रह्मेत्यादि
सुप्रतिपादितं यत्तत्त्वं तद्वदंतीति निष्कृतितत्त्वविदस्ते ब्रह्मज्ञानिनः ॥ वदंतीत्यन्वयः सुबुद्धेः स्वकारणे परमं सुषुप्तिं
प्रवदंतीत्यर्थः ॥ १० ॥

यस्मात्तत्वमसिवाक्यमज्ञाननिवर्त्तकं तस्मात्त्वं देहादिष्वहंबुद्धिं ममाभिमानं च परित्यज्यैवं देकवाक्यार्थज्ञानानुकूलतया
वर्तस्वेति शिष्यं शिक्षयति गुरुः ॥ यत एवेति यत एवं यस्मादिदं वाक्यमज्ञाननिवर्त्तकं ततः कारणात्त्वं शरीरगतां सुहृदामह
ममेत्य । नादिसिद्धामहमित्यविवेकमतिं प्रविहाय ततः यत एवेति यत एवं यस्मादिदं वाक्यमज्ञाननिवर्त्तकं ततः कारणा
परमद्वयं सजातीयविजातीयनानात्वरहितं न क्षरतीत्यक्षरं यद्ब्रह्म तदात्मतयाऽवेहि स्वरूपत्वेन जानीहीत्यर्थः ॥ ६ ॥ त्व
मेवेहि तदक्षरमात्मतयेति प्रत्यग्ब्रह्मणो मनआदेः कत्वमुक्तं न तस्य त्वंपदार्थपरिशोधनं करोति श्लोकयुग्मेन न मनो
न मतिरित्यादिश्लोकद्वयेन तत्पदार्थपरिशोधनं क्रियते तत्राद्यश्लोकेन तत्पदलक्ष्यस्य ब्रह्मणो मनआदिवैलक्षण्यं सा

स्व यत एवमतः शरीरगतामहमित्यविवेकमतिं सुदृढां ॥ प्रविहाय यदक्षरमद्वयकं त्वमवेहि तदक्षर
मात्मतया ॥ ६ ॥ न मनो न मतिः करणानि च नो न रजो न तमो न च सत्वमपि ॥ न मही न जलं
न च वह्निरपि श्वसनो न नभश्च पदं परमं ॥ ७ ॥

धयति द्वितीयश्लोकेन मनआदिना संबंधराहित्यं दर्शयति ॥ न मन इति ॥ न मनो न मतिरित्यादि श्लोकद्वयस्या
यं भावः मनआदिकमात्मा न भवति दृश्यत्वात्करणत्वात्कार्यत्वाद्विभक्तत्वाज्जडत्वात्परिछिन्नत्वादाद्यंतवत्वाच्च ए
वं मनआदेरनात्मत्वे सिद्धे तत्साक्षिण आत्मनो निरवयवत्वादसंगस्वभावत्वादहंकारममकारादिरहितत्वाच्च ।
नित्यत्वं शुद्धत्वं बुद्धत्वं मुक्तत्वमविलुप्तदृक्स्वरूपत्वं च सिद्धं यदेवं भूतमक्षरं परं तदात्मतयेत्युपदे
शकारः ॥ ७ ॥

19

अ०सा २८

नन्ववस्थात्रयापेक्ष्यंतुरीयत्वंभवतु यथा पितत्सत्यंभविष्यतीत्याशंक्यावस्थात्रयस्य मायामयत्वात्तदपेक्षितंतुरीयत्वम
पितथाविधमेवेत्यभिप्रेत्याह। यदपेक्ष्येति। यदवस्थात्रयमपेक्ष्य परमात्मपदस्य परमात्मवस्तुनस्तुरीयमिती दमभि
धानंभवेत् तदवस्थात्रयमसत्यं अवस्थात्रयस्यासत्वेहेतुमाह। तदसत्यमसत्यगुणइति। असत्यस्यमनसोगुणोधर्म
इति स्मात्तस्मात्तदवस्थात्रयमसत्यं असत्यधर्मस्यासत्वेदृष्टांतमाह। परिनिर्मितेतिमत्तगजाकीर्णवनप्रदेशे
संचरतांगजभीरुणांकेनचित् गजपरिमितया याणसमारोपितस्य वारणस्यचेष्टितंकरचरणादिमत्ववत

यदपेक्ष्यभवेदभिधानमिदंपरमात्मपदस्यतुरीयमिति। तदसत्यमसत्यगुणश्चततःप
रिनिर्मितवारणचेष्टितवत्॥१४॥गगनप्रमुखंपृथवीचरमंविषयेंद्रियबुद्धिमनःसहि
तं॥जनिमज्जगदितदभूतमितिश्रुतयःप्रवदंत्युपमानशतैः॥१५॥१५॥

चेष्टितंच यद्वदसत्यं तद्वन्मायामयस्य मनसोगुणत्वादवस्थात्रयमप्यसत्यंतस्मात्ततदपेक्षितंतुरी[illegible]त्व
मपिपरमात्मव्यतिरेकेणवस्तुतोनास्तीत्यभिप्रायः॥१४॥असत्यमनोधर्मत्वाज्जागरितादित्रयमसत्यमित्युक्त
मिदानींतत्साधनायमनआदिजगतोअसत्यत्वंसाधयति। गगनेति। गगनप्रमुखंपृथवीचरमंआकाशमारभ्य
पृथिव्यंतंविषयेंद्रियबुद्धिमनःसहितमेतत्सर्वंजगदभूतंअसत्यमितिश्रुतयः॥उपमानशतैः॥प्र
वदंतिमनआदिजगतोदृष्टांतशतेनजनितत्वान्मिथ्यात्वंकथयंतिश्रुतियइत्यर्थः॥१५॥

एवमवस्थात्रयं दर्शयित्वा इदानीं तत्साक्षिणश्चिदात्मनोऽवस्थात्रयाराहित्यं दर्शयति । इति जागरितमिति । इत्थं क्रमेणोक्र
मतश्च यातायाते वर्त्तमानं जागरितं स्वपनं सुषुप्तिमित्येतदवस्थात्रयं धिए वृधी धर्मः एव तत्साक्षिणश्चिदात्मनो मम कदाचिद
पि इदमवस्थात्रयं नास्तीत्यवगच्छ किं च सदा देहेंद्रियमनः सांप्रसादे शांतावपि स्वयं प्रकाशपरमानंदचित्घनमवस्थात्र
यातीतं तुरीयं पदं तदेवाहमस्मीत्यवगच्छ तदुक्तमाचार्यैः सुषुप्तजाग्रत्स्वपनश्च दर्शनं मेस्ति किंचित्स्वमिवेह मोहनं तं
नस्वतश्च तेषां परतो ह्यसत्त्वतस्तुरीय एवास्मि सदा दृगद्वय इति एवं जानीहीत्यर्थः ॥ १२ यद्येवं तस्यात्मनस्तुरीयत्वं नाम

इति जागरितं स्वपनं च धियः क्रमतोक्रमतश्च सुषुप्तमपि न कदाचिदपि त्रयमस्ति मेत्यवग मे
च्छ तदास्मि तुरीयमिति ॥ १२ ॥ यदु जागरितं प्रभृति त्रितयं परिकल्पितमात्मनि मूढधिया ॥ अ
भिधानमिदं तदपेक्ष्य भवेत्परमात्मपदस्य तुरीयमिति ॥ १३ ॥

च तत्त्वं परमार्थतो गीकृतं स्यात्ततश्चात्मनो निर्विशेषत्वं कथं स्यादित्याशंक्यावस्थात्रयमपेक्ष्य तुरीयत्वमित्याह त
स्यासत्त्वकथमाय । यदु जागरितेति मूढधिया ऽविवेकिनाऽज्ञत्वगात्मनि यज्जागरितप्रभृतित्रयं परिकल्पितं तदवस्था
त्रयमपेक्ष्य परमात्मपदस्य तुरीयमितीदमभिधानं भवेत् यस्मात्तुरीयत्वं साक्षात्तस्मात्तुरीयशब्दवाच्यमव
स्थांतरं वस्तुतो नास्तीत्यग्रहण अन्यथाग्रहण रहितं स्वयं प्रकाशपरमानंदचिद्घनं परमात्मतत्त्वं तुरीयशब्दे
नाविवक्ष्यते न तु तुरीयमित्यवस्थांतरं ततश्चात्मा निर्विशेषः सिद्ध इति तात्पर्यमभिप्रायः ॥ १३ ॥

२०

श्रु०ति० रं त्रैरूप्यमग्न्यादित्रितयस्यानृतत्वं श्रुतिरुक्तवतीत्याकांक्षायामाह यदुरोहितशुक्लसुकृष्णमित्यारभ्य अनयोपमयानृ
२९ तइत्यंतेन ग्रंथेन यदुरोहितेति। यदग्नेरोहितं रूपंतेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं
वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमिति छांदोग्यश्रुतिः। ज्वलनादिष्वनुगतं यद्रोहितशुक्लमिदं
रूपं जनो वेति जानाति तेषां रूपाणां मध्ये यद्रोहितं रूपं तत्तेजसं तेजःसंभवं तत्तेजसः कारणं रोहितमित्यर्थः। तेषां मध्ये
८ यच्छुक्लं तदाप्यमस्संबंधि तेभ्दे नामृतकिरणश्चंद्रमा अलन्हले तस्मात्मयमर्थः। तेषां मध्ये यच्छुक्लं रूपं तदाप्यं चां
द्रमसं चंद्रमसः कारणं यच्छुक्लं रूपमिति यावत्तेषां मध्ये यत्कृष्णं रूपं भास्वरं कृष्णवर्णं तदन्नसंबंधि अन्नशब्देनल
क्षितो दिवाकरः। तस्य कारणं सुकृष्णमिति यावत् आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्मयेन
सविता रथेन देवो याति भुवनानि पश्यन्निति श्रुत्या दिवाकरस्य कृष्णरूपत्वमवगम्यते एवं ज्वलनहिमकरदिवाकराणां

यदुरोहितशुक्लसुकृष्णमिदं ज्वलनादिषु रूपमवेति जनः। तद्धि तेजसमाप्यमथान्नमिति ब्रुवति त्रय

रोहितशुक्लकृष्णकार्यत्वं ब्रुवती श्रुतिस्त्रयमेव सत्यमित्युक्तवती कारणभूतमरुणादित्रयमेवमित्यंतत्कार्यमग्न्यादि
त्रयमसत्यमिति सिद्धं तत् दृष्टांतेन कार्यस्य मनआदिजगतो मिथ्यात्वं कारणस्य ब्रह्मणः सत्यत्वं च साधयितुं शक्य
मित्यभिप्रायः। एवं कारणस्यारुणादेः सत्यत्वं कार्यस्याग्न्यादेरसत्वं च श्रुत्योक्तं तर्हि केन दृष्टांतेनाग्न्यादिकस्य मिथ्या
त्वं अरुणादित्रिकस्य सत्यत्वं चोक्तमित्याकांक्षायामत्र दृष्टांतं दर्शयितुं कनकादेः। सत्यत्वं रुचकादेरसत्यत्वं च दर्श
यति रुचकप्रमुखमिति कनकादिमयं कनककार्यं रुचकप्रमुखं रुचकाद्यभिधानमित्तं यद्यपि तथाप्यसदित्यवग
१० म्यते रुचकादिमसत्यमिति ज्ञायते यत इति रुचकादिमतिर्व्यभिचरतीति यतश्चातः कारणादसदित्यवगम्यत इत्य
र्थः। कार्यस्य रुचकादेरसत्यत्वमुक्त्वाऽधुनाकारणस्य कनकादेः सत्यत्वं साधयति नकदाचिदपीति दृष्टुः पुरुष
स्य कनकादिमतिः। कदाचिदपि न व्यभिचरतीति यतः कनकमितिमतिः कनकार्यं रुचकादौ सर्वत्राप्यनुस्यूतेति यस्मा

कृतएतदित्यत्राह ३

त

तत्रदृष्टान्तं दर्शयितुमुपोद्घातं करोति। कफेति। प्रतिपाद्यमर्थं बुद्धौ संगृह्य प्रागेव तदर्थमर्थान्तरवर्णनमुपोद्घात इति ल
क्षणं ज्ञेरूपदिश्यामुपोद्घातप्रक्रियामाश्रित्य मनश्चादेरनृतत्वं साध्यते इदं शरीरं कुत्सितं कुशरीरमिति यथा सततं क
फपित्तसमीरणधातुध्वस्तं वातपित्तश्लेष्माख्यस्य धातोर्वैषम्ये सति शरीरस्य नाशदर्शनात्त्रैधातुवैषम्याभावे
च स्वास्थ्यदर्शनाच्छरीरं कफपित्तसमीरणधातुध्वस्तमित्युच्यते। यथायं दृष्टान्तस्तथा प्रभवप्रभृतिप्रलयान्तमिदं ज

कफपित्तसमीरणधातुध्वस्तं कुशरीरमिदं सततं हि यथा। प्रभवप्रभृतिप्रलयान्तमिदं
जगदग्निरवीन्दुध्वस्तं हि तथा ॥१६॥ जगतः स्थितिकारणमित्थमिदं प्रथितं रवि
वह्निशशित्रितयं। स्मृतिवेदजनेषु भृशं यदिति श्रुतिरीरितवत्यनृतं न दिति ॥१७॥

व

गदग्निरवीन्दुभिर्ध्वस्तमग्न्यादीनां ज्योतिषां मन्यतमस्याप्यभावे जगदंधतमो भवेत्ततश्च जगतः स्थितिरविनस्या
दित्यभिप्रायेण जगदग्निरवीन्दुध्वस्तमित्युच्यत इति भावः॥१६॥ कुशरीरधारकधातुत्रितयं जगद्धारकस्याग्न्यादि
त्रितयस्यास्त्यत्वं श्रुतिर्दृष्टान्तेनोक्तवतीत्याह। जगत इति। इत्थमुक्तेन प्रकारेण तद्रविवह्निशशित्रयं जगतः स्थि
तिकारणमिति स्मृतिवेदजनेषु प्रसिद्धं प्रथितमिति। एतस्य वाक्यद्वारस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ ति
ष्ठतः। अहं वैश्वानरो भूत्वेत्यादि पचाम्यन्नं चतुर्विधमित्यंतेन यदादित्यगतं तेजइत्यारभ्य तत्तेजो विद्धि मामक
मित्यंतं अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति वेदस्मृति विद्व

श्रु॰ सार कारणद्रव्यापकर्षेणं कार्यद्रव्यस्यानृतत्वसाधकमित्येतद्द्लोकेपि द्रष्टुमित्याह । प्रदीति । वसनस्य वस्त्रस्य वितथत्वं प्र
३० दिदर्शयिषुः पुरुषस्तन्तुगुणमयास्यति तंतुकार्यं पटं यथाऽयास्यति निरस्यतीदं वस्त्रं तंतुमात्रमिति तथाऽत्रा
पि तंतुसमं त्रितयं कारणभूतमरुणादित्रितयमपकृष्य स्वीकृत्य ज्वलनप्रमुखस्याग्न्यादित्रिकस्य मिथ्यात्वमुक्तवती
त्यर्थः । २४ । एवमग्न्यादिदृष्टान्तेन मनआदिजगतो मिथ्यात्वमरुणादिदृष्टान्तेन ब्रह्मणः । सत्यत्वं च श्रुत्याविवक्षितमि
त्युक्तमिदानीं तत्र हेत्वाकांक्षायां कार्यत्वात्कारणत्वाच्चेत्युभयत्र हेतुमाह । अवनीति । अवनिप्रमुखं वियदन्तमिदं अ

प्रादिदर्शयिषुर्वसनस्य यथा वितथत्वमयास्यति तंतुगुणं । अपकृष्य तु तंतुसमं त्रितयं
ज्वलनप्रमुखस्य तथोक्तवती ॥ २४ ॥ अवनिप्रमुखं वियदन्तमिदं विकृतिस्तु परस्य
भवत्यपरं । अनृतं त्वपरं विकृतिस्तु यतो वितथं तु परं प्रकृतिस्तु यतः ॥ २५ ॥ २५

परमर्वाचीनं परस्य ब्रह्मणः विकृतिः कार्यं भवति किमतस्तत्र फलितमित्यत्राह । अनृतं त्विति । अपरं दृश्यमानत्वान्प्र
तीयमानं जगत्सकलं परस्य ब्रह्मणो विकृतिस्तु यतः कार्यं तु यतः कारणादन्तं परं तु कारणं ब्रह्म त्ववितथं वि
तथं न भवतीति कुत इत्यत्राह प्रकृतिस्तु यत इति कारणं तु यस्मात्तस्मादवितथं सत्यमित्यर्थः । अयं भावः दृश्यमन
आदि जगदनृतं भवितुमर्हति कार्यत्वादग्न्यादिवत्पर ब्रह्म तु सत्यं कारणत्वादरुणादिवत् अग्न्यादित्रितयमस
त्यं कार्यत्वात् वकादिवदिति सत्[illegible]र्थः । अरुणप्रमुखं त्रितयं सत्यं कारणत्वात्कनकादिवदिति समुदायार्थः । २५

तस्मा त्कनकादिसत्यतयाभिमतमुक्तं हेतुं निगमयति ॥ विपर्ययएषुनहीति ॥ एषु कनकादिरुचिकादिषु विपर्ययो न हि
व्यत्ययो नास्ति यस्मात्तस्मात्कनकादिसत्यं रुचकाद्यसत्यमित्यर्थः ॥ नहि दृष्टांतदार्ष्टांतिकयोर्मध्ये कस्य केन सह
सांम्यमित्यपेक्षायामाह ॥ रुचकादीति ज्वलनादिरग्न्यादिस्त्रितयं रुचकादिसमं भवेत्तत्र हेतुं कथयति अनृतत्वगुणेन
त्विति अनृतगुणवत्वादित्यर्थः ज्वलनप्रभृतित्रिकमिति त्रितयं ज्वलनप्रभृतेः कारणत्रितयं अरुणप्रमुखं सत्यत्वादेव
कनकादिसमं अनेन कनकरुचिकादिदृष्टांतेन कारणस्यारुणादेः सत्यत्वं कार्यस्याग्न्यादेरसत्यत्वमुक्तवतीश्रुतिरि
त्याह ॥ अनयेति यथा सोम्यैकेन मृत्पिंडेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिके ,व सत्यमि
त्यादिनाऽखिलस्य कार्यस्य कारणतावन्मात्रत्वं वदतिश्रुतिरनयोपमया कनकरुचकादिदृष्टांतेन अग्निदिवा
रुचकप्रमुखं कनकादिमयं रुचकाद्यभिधानमित्यपि असदित्यवगम्यतएव यतो व्यभिचारवतीरुच
कादिमति ॥ १९ ॥ नकदाचिदपि व्यभिचारवती कनकादिमतिः पुरुषस्य यतः ॥ ततएव हि सत्यतयाभि
मतं कनकादि विपर्यय एषु नहि ॥ २० ॥ रुचकादिसमं ज्वलनादि भवेदनृतत्वगुणेन तु सत्यतया ॥ अ
अनयोपमयानृततामवदच्छ्रुतिरग्निदिवाकरचंद्रमसां अमृषात्वमपि श्रुतिरुक्तवती त्रितयस्य तु रक्त
पुरःसरिणः ॥ २२ ॥ अनृतत्वमिदं ज्वलनप्रभृतेर्यदवादि भवेत्तदुदाहरणं ॥ वितथा विकृतिः सततं स
करचंद्रमसामनृततामवदत्स उक्तवतीति किं च रक्तपुरःसरिणस्त्रितयस्यामृषात्वमपि सत्यमुक्तवतीत्यर्थः १८ १९
२० । २१ । २२ उपमानशतैर्मनआदिजगतोऽनृतत्वं श्रुतिरुक्तवतीति पूर्वमुक्तमिदानीं तदुपमानशतं विविच्य दर्श
यति ॥ अनृतेति ॥ रुचकादिदृष्टांतेन ज्वलनप्रभृते यदनृतत्वमवादि तदिदमुदाहरणं भवेत्तत्कथमित्यत आह वितथा
विकृति सततं सकलमिति सततं सकला विकृतिर्वितथा सर्वो विकारजातमसत्यं प्रकृतिस्तु न तथा कारणं तु तथा विधं
न भवेत् किंतु सत्यमेवेति निश्चये नोक्तमित्यर्थः ॥ २३ ॥

अ०स्रा॰ ननुनैतद्योग्यं घटते छांदोग्ये सप्तमे आत्मनो मनइतिमनसः परमात्मकार्यत्वश्रवणादित्याह सिद्धांती। नन्विति। छांदो
३१ ग्योपनिषदि सप्तमाध्याये आत्मनः सकाशादसुनापि सह प्राणेन च मनस उद्भवनमभिदधौ श्रुतिरिति यस्मात्तस्माद्वि
कृतित्वगुणस्य कार्यस्य मनसोऽमृषात्वगतिः सत्यत्वावगतिः कथं भवेत्तस्मात्परमात्मकार्यत्वश्रवणात्मनोऽनृतमि
त्यर्थः २९ मुंडकेपि मनस उद्भवनं परमात्मनः श्रुतिमित्याह॥ असुनेति एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि
च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीत्यादि मुंडकेपि॥ असुना प्राणेन करणैरिंद्रियैर्गगनप्रमुखैराकाश

ननु सप्तमे आत्मन उद्भवनं मनसोऽभिदधावसुनापि सह। कथमस्य भवेदमृषा च गतिर्म
नसो विकृतित्वगुणस्य वद॥२९॥ असुना करणैर्गगनप्रमुखैः सह मुंडक उद्भवनं मन
सः। पुरुषात्परमात्मन उक्तमतो वितथं मनइत्यवधारय भो॥३०॥

दिभिश्च सह पुरुषात्परमात्मनः सकाशान्मनसः। उद्भवनमुक्तमिति यतः अतः कारणादपि मनो वितथा
मन्नृतमित्यवधारनिश्चिन्वित्यर्थः॥३०॥ एवं परमात्मकार्यत्वश्रवणान्मनसोऽनृतत्वमुक्तमिदानीं भौतिकत्व
श्रवणादपि मनसोऽनृतत्वं सिद्धमित्याह मनस इति॥ अन्नमयं हि सोम्य मनः। अन्नमशितं त्रेधा विधीयते तस्य यः
स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनो भवतीति मनसोऽन्नमयत्वमन्नकार्यत्वम्
वादि यत अत एव कुशरीरवद्भूतमयत्वगतिः भूतकार्यत्वावगतिस्ततोपि मनो वितथमसत्यमित्यवधारयेत्यर्थः

यथोक्तेनहेतुना साधितमर्थमुपसंहरति। अतएवेति कारणं सत्यं कार्यमसत्यमितियस्मात्तस्मात्सदुक्तिपरं ब्रह्मन
मृषामृषानभवेत्ततोन्यत्तुमृषातस्मा द्ब्रह्मणोन्यत्सर्वंमृषाअसत्यमित्येतदसेधिसिद्धंततः किमितितत्राह इतिसिद्ध
मतोजन्निमज्जगदेतदद्भूतमिति यत्पूर्वं मयाऽवादितदिदंसिद्धमित्यर्थः।२६ननूक्तहेतुना जगतो मिथ्यात्वंभ
वतु मनसस्तच्चरितस्यवाजागरितादेश्चनमिथ्यात्वसिद्धमित्यत्राह। मनसइति। अमुतः प्रतिवादितहेतुतएवमनसो
ऽनृतत्वमसेधि कार्यत्वादित्यनेनैवहेतुनामनसोनृतत्वंप्रसिद्धमित्यर्थः। यस्मात्मनसोऽनृतत्वं तदीययच्चरितमव

अतएतदसेधिसदुक्तिपरंनमृषेतिमृषातुततोन्यदिति॥ इतिसिद्धमतोयदवादिमयाज
निमज्जगदेतदद्भूतमिति॥२६॥मनसोप्यनृतत्वमसेध्यमुतः प्रतिवादितहेतुतएवभ
वेत्तच्चरितंचतदीयमसत्यमतः परिनिर्मितवारणचेष्टितवत॥२७॥ ननुनाभ्यवदस्त्कृति
रुद्भवनंमनसस्तस्ततोनचखप्रमुखात्कथमस्यभवेदनृतत्वगतिर्मनसोभगवन्वदनिश्चय
तः॥२८॥

स्याच्चयमप्यनृतंतत्रदृष्टांतमाह परिनिर्मितवारणचेष्टितवदिति यथापरिनिर्मितवारणचेष्टितमसत्यधर्मत्वा
त्तद्वदत्राप्यसत्यधर्मत्वादवस्याच्चयमसत्यमित्यर्थः॥२७॥ ननुमनसः कार्यत्वेसिद्धेमनसोनृतत्वं स्यात्तदेवनास्तिअ
कृतत्वादित्याशंक्यतेपूर्ववादी॥ नन्विति॥सतः परमात्मनः॥सकाशान्मनसउद्भवनंनाभ्यवदत् खप्रमुखादपि
उद्भवनंनाभ्यवदत्तस्मादस्यमनसोऽनृतत्वगतिरसत्वावगतिः॥कथंभवेत्भोभगवन् विचार्यवदेत्यर्थः॥२८

स्क०सा० ३२

एवंकनकरुचकादिदृष्टांतेनकार्यंकारणव्यतिरेकेणनास्तीतिस्वसिद्धांतःसमर्थितः।तत्रेदमाशंकतेकार्यकारणयोर
त्यंतभेदोस्त्येवतयोस्तादात्म्यप्रतिभासस्तुसमवायसंबंधनिबंधनइतिवैशेषिकादयस्त्राहस्तान्प्रत्याहकनकादीति।क
नकादिषूपजातंरुचकप्रमुखंकनकादेःसकाशात्पृथगेवाभूद्यदितर्ह्यमीषुरुचकादिष्वधिकंपरिमाणंगुरुत्वं

का

कनादिषुयेषूपजातमभूद्रुचकप्रमुखंपृथगेवततः॥अधिकंपरिमाणम
मीषुकुतोनभवेदितिवाच्यमवश्यमिदं।३४।कनकप्रभृतेर्व्यतिरिक्तममीरु
चकादिनविद्यतएवकुतः।पृथगग्रहणात्कनकप्रभृतेरितिकारणमेवसद
न्यदसत।३५।

कुतोनभवेदितिपृष्टेसतिकुशलैस्तार्किकैः।यदिदमवश्यंवाच्यमस्यप्रश्नस्योत्तरंवक्तुमवश्यमित्यर्थः॥३४॥इ
तश्चकार्यकारणयोर्भेदोनयुक्तइत्याह।कनकेति।अतोरुचकादिकनकप्रभृतेर्व्यतिरिक्तंनविद्यतेतत्कुतइत्य
त्राह।पृथगिति।कनकप्रभृतेःपृथगग्रहणाद्भेदेनादर्शनात्तस्मात्सदाकारणमेवसत्यमन्यदितरदसत्यमि
त्यर्थः॥३५॥

एवं कार्यत्वहेतुनास्मन्न आदिजगतोऽनृतत्वं साधितमिदानीमाद्यंतवत्वादित्यनुमानांतरेणापि मन आदिजगतो ऽनृतत्वं साधितव्यमिति शिष्यं शिक्षयति ॥ कुरुपक्षमिति ॥ गगनप्रमुखं जनिमत्सकलं जगत्सत्यं न भवतीति पक्षं कुरु प्रतिज्ञां कुरु तत्र हेतुं कथयति ॥ प्रथमं चरमं च न चास्तियत इति तत्र दृष्टांतमाह ॥ रुचिकादिवदुपमां च वदेति ॥ ३२ ॥ कनकरुचकादि दृष्टांतदार्ष्टांतिकार्थान् प्रपंचयति ॥ कनकेति ॥ कारणभूते कनके रुचिका

मनसोऽन्नमयत्वमवादियुतस्ततएव हि भूतमयत्वगतिः ॥ कुशरीरवदेव ततोऽपि मृशं

वितथं मन इत्यवधारय भो ॥ ३१ ॥ कुरु पक्षमिमं गगनप्रमुखं जनिमत्सकलं न हि सत्यमिति ॥ प्रथमं चरमं च न चास्ति यतो रुचकादिवदित्युपमां च वद ॥ ३२ ॥ कनके रुचकादि न पूर्वमभूच्चरमं च न विद्यत इत्यनृतं ॥ अधुनापि तथैव समस्तमिदं जनिमद्धियदादिमवेदनृतं ॥ ३३ ॥

दि कार्यं प्रथमं नाभूच्चरमं च न विद्यते ॥ आद्यावंते च यन्नास्ति वर्त्तमाने च तत्तथा वितथैः सदृशाः संतोऽवितथा इव लक्षिता इति न्यायात् ॥ अधुना वर्त्तमानकालेऽपि कनकव्यतिरेकेण ॥ रुचिकादि न विद्यते यथा तथा जनिमद्वियदादि समस्तं जगदनृतमसत्यं भवेदित्यर्थः ॥ ३३

सिद्धांती ॥ नन्वति रूपंचकार्यंचाभिधायिनटस्य पृथग्विदिता
 नके वलं तदनुमानंप्रत्यक्षविरुद्धं किं त्वनेकांतिकं चेत्याह भवद्भिरिदमवश्यंप्रतिवाच्यंप्रतिवक्तव्यमस्यो
 यद्यपिनटः पृथक्त्वं किमिति नोपैतीति मया पृष्टेसति कुशले र्न्यायकुशलैः सदसत्सदसतामुत्पत्त्यसंभवेन कार्यकारणत्वस्य कल्पितत्वाच्च कार्य
न्तरं तव पित्रादिन शक्यते वक्तुमित्यभिप्रायः ॥ ३९ ॥ यद्विशेषि
कारणव्यतिरेकेण नास्तीत्युत्तरेण कतिपयग्रंथेनाह ॥ असतो न कथंच जन्म भवदित्यादिना तत्रासदिति वैशेषि

ननु रूपमथो अपि कार्यमथो अभिधायिनटस्य पृथग्विदिता ॥ न पृथक्त्वमुपैति नटः किमि
तिप्रतिवाच्यमवश्यमिदं कुशलैः ॥ ३९ ॥ असतो न कथंचन जन्म भवेत्तदसत्त्वत एव खपु
ष्पमिव ॥ न सतोस्ति भवः पुरतोपि भवाद्यत आत्मवदेव सदिष्टमिति ॥ ४० ॥ मया पृष्टे सति

कमतं सदिति सांख्यमतं सदसदिति दिगंबरमतं ॥ तत्र प्रथमं वैशेषिकमतं निराकरोति असतइति ॥ उत्पत्तेः प्रागस
तः कार्यस्य न कथंचन जन्म भवेत्तत्र हेतुमाह तदसत्त्वत एवेति ॥ कार्यस्यात्यंतमसत्वादेव खपुष्पमिव आकाशपुष्प
वदित्यर्थः यद्यसतो जन्म संभवेत्तर्हि सतो जन्मास्त्विति सांख्यास्तन्मतं दूषयंति ॥ न सतोस्तीति उत्पत्तेः प्रागेव सतो विद्य
मानस्य कार्यस्य भावो जन्म न संभवति कुतो न संभवतीत्यत्राह ॥ पुरतोपि भवादिति उत्पत्तेः प्रागेव सत्वादात्मवत् नतवा
त्मनो जन्मेत्युच्यते ॥ यत आत्मवदेव सदिष्टमिति सत्कार्यं सर्वदा सदेवेष्टमिति परमार्थत्वं यस्मादेवं तस्मात् सतोः ज
न्मसंभवतीत्यर्थः ॥

दर्शितं तथा रूपस्याकारोऽपि पृथगेवातः कार्यमपि पृथगेव पतत्येवमतः कारणात्प्रकृतेः २

ननु तथापि नामरूपकार्यैः कार्यकारणयोर्भेद एव युक्त इति शंकते पूर्ववादी। नन्विति प्रकृतेः कारणात्सकाशाद्विकृतेः सकाशाद्विकृतेरव्यतिरिक्ततयावगमः। कथं कार्यकारणयोरभेदावगतिः कथमिदं वाच्यं वक्तव्यं ३६ कारणात्कार्यं भिन्नं भवितुमर्हति नामभेदाद्रूपभेदात्कार्यभेदाच्चेत्येतदनुमानं प्रत्यक्षविरुद्धमित्याह सिद्धान्ती। इहेति इह व्यवहारदशायामुपलब्धजनैः। वीरणतन्तुसुवर्णमृद एव कटशाटकहारघटाकृतयः घटकाद्याकारेण उपलब्ध

ननु नामपृथग्विकृतेः प्रकृतेः पृथग्रूपमथापि च कार्यमतः। कथमव्यतिरिक्ततयावगमः प्रकृतेर्विकृतेरिति वाच्यमिदं ॥३६॥ इह वीरणतन्तुसुवर्णमृदः कटशाटकहारघटाकृतयः। उपलब्धजनैरुपलब्धमतो न भिदास्ति ततः प्रकृतेर्विकृतेः ॥३७॥ विकृतिर्यदि नास्ति पृथक् प्रकृतेर्न घटेत भिदाप्यभिधाप्रमितेः। इति धीर्विफला तव येन जनैर्विविदे नयनेन मृदाद्यभिदा ॥३८॥

मतः कारणरूपं वीरणतन्त्वादिकमेव घटवस्त्राभरणादिरूपेण दृष्टमिति यतः अतः कारणादेव प्रकृतेः सकाशाद्विकृतेर्भेदो नास्तीत्यर्थः ३७ यथोक्तमर्थं विवृणोति। विकृतीति प्रकृतेः सकाशाद्विकृतिः पृथग्नास्ति यदि तर्हि अभिधाप्रमितेः भिदापि न घटेत नामरूपकार्यभेदोऽपि न घटत इति तव या धीः सा विफला कार्यकारणयोर्भेदसाधिका न भवेत् कुतो न भवेदित्यत आह। नयनेनेति प्रत्यक्षेण कार्यस्य घटादेर्मृदाद्यभिकारणादभेदो जनैर्विविदे विदित इति येन तत्

हेतुना तव धीर्विफला स्यादित्यर्थः ३८

अ०सार नास्तीति द्वितीयं पक्षं दूषयति। यदीति। सगुणः सत्वविशेषः पुराप्रकृतौ कारणे नास्ति यदि तर्हि सदुद्भवनं भवतोभिमतं
२६ स्यात् सत्कार्यवादिना भवता असदुत्पत्तिरंगीकृता स्यात्तथासति तव अपसिद्धांतः प्रसज्येत न केवलमसदुत्पत्यंगीकारः
सद्विनाशश्च प्राप्नोतीति दूषणांतरमाह। जननेनेति। जननेन जन्मना सतमुपात्तवतः कार्यस्य जनिमत्वत एवोत्पत्तिम
त्वादेव विनष्टिरपि प्राप्नोति सतो विनाशोपि त्वयांगीकृतः स्यादित्यर्थः। ४४ अनुभवत्वसदुत्पत्तिः सद्विनाशश्चोपगम्यश्च
तथा सति को विरोध इत्यत आह। भवत इति। भवतोभिमतमंगीकृतमिदमसद्भवनं सतो विनाशनं च परिहर्तुं कथं च न श

यदि नास्ति पुरा सगुणः प्रकृतावसदुद्भवनं भवतोभिमतं। जननेन च सत्वमुपात्तवतो जनिमत्वत एव वि
नष्टिरपि। ४४ भवतोभिमतं परिहर्तुमिदं न कथं च न शक्यत इत्युक्तः। कणभक्षमतेन समत्वमिदं भव
तोभिमतं गणकैरगमत्। ४५ असतो भवनं नशनं च सतः कणभोजिमतं विहितं कविभिः। उपपत्ति
विरुद्धतया सुभृशं तदभाणि मयापि विरुद्धतया। ४६

तो

क्यमित्युक्ते अहो भवतोभिमतमसतोभवनं कणभक्षमतेन कणादमतेन समत्वं साम्यं गणकैरगमत् शनैः शनैः प्राप्तमित्य
र्थः। ४५ तर्हि कणादमतं किमित्याकांक्षायां तन्मतं दर्शयति। असत इति प्रागसतः सत्तासमवायो जन्मेत्यंगीकारा
दसतः कार्यस्य भवनमुत्पत्तिः सतो नशनं चेति कणभोजिमतं कविभिः पूर्वाचार्यैर्विदितमस्तु नामैवं कणादम
ते ततः किमायातमित्यत आह। उपपत्तीति। उपपत्तिविरुद्धतयोर्भाणि असदसतोर्जन्मासंभवात् कार्यस्यानिर्वचनी
यत्वमेवं मयाप्युक्तमित्यर्थः। ४६ न्यायविरुद्धतया असतो जन्म सतो नशनं चेत्युभयं
सूत्रं युक्तिविरुद्धतया अभाणि मणि तं चाच
र्वकार्यानिर्वचनीयत्ववादिना मयापि त
दुभयं विरुद्धतया। ४६

सतोजन्मनसंभवतीत्युक्तमुपश्रुत्यसत्कार्यवादिनः। सर्वसंभूयोतिष्ठंतीतिदर्शयति कपिलासुरीति कपिलासुरिपं
चशिखादिमतंपंचशब्दशब्देनकश्चित्सूमिमांसक उच्यते सांख्यचावींमीमांसकानांमतंपरिगृह्यकश्चित्सत्कार्यवादी
इदंशब्देननिर्दिष्टं किमित्यपेक्षायांतत्दर्शयति। नकदाचनेति। नकदाचनसतोजन्मवदामितर्हिकिंवदसीत्यत्राह य
त्रवदामितत्वमपिशृणुस्वावधानमतिभवेत्यर्थः ४१। अहंयत्रवदामितत्त्वमपिशृणुवितियत्सत्कार्यवादिनोक्तमिद
मीतत्रवदतिप्रकृतावितिप्रागेवविद्यमानंयत्कार्यंप्रकृत्यविशिष्टतयाअभूत्कारणेनिर्विशेषतयास्थितंतदेवाधुना

कपिलासुरिपंचशिखादिमतंपरिगृह्यवदेद्यदिकश्चिदिदं। नकदाचनजन्मवदामिसतःप्रवदा
मितुयच्छृणुतत्वमपि॥४१॥प्रकृतावविशिष्टतयायदभूदधुनातुतदेवविशेष्ययुतं। निरव
द्यमिदंप्रतिभातिममप्रवदात्रविरोधमवेहियदि॥४२॥सदयुज्यतयेनगुणेनपुरापकृतौसइहास्ति
नवेतिवद। यदिविद्यतएवपुराप्रकृतावधुनापिविशेष्ययुतत्वमसत्॥४३॥

उत्पत्तिसमयेविशेष्ययुतंनिर्विशिष्टमासीदितीदंमतंनिरवद्यंममप्रतिभातिअत्रविरोधमवेहियद्यवगच्छसियदितर्हि
धं विरोधंवदअस्मिन्मतेविरोधोनास्तीतिसत्कार्यवादिनोभिप्रायः॥४२॥अत्रविरोधंवदेत्युपश्रुत्यसिद्धांतिविकल्प्यविरोध
माह। सदिति। सत्कार्यमुत्पत्तिसमयेयेनगुणेनअयुज्यतयुक्तमासीत्सतुगुणःसतुविशेषःपुराउत्पत्तेःप्राक्प्र
कृतावस्तिवानवेतिवदेतिप्रश्नमपहायदूषणमाह। यदिविद्यतइति। सतुविशेषःपुराप्रकृतौविद्यतेयदितर्ह्यधुना
विशेष्ययुतमितित्वयोक्तमसदयुक्तमित्यर्थः॥४३॥

अ०सार
२५

सदसद्वादिनां दुर्बलत्वमुपलभ्य प्रौढवादेनाह सिद्धांती यदीति वः युष्माकं मते अमुष्य मनआदेः सदसत्त्वमपेक्ष्य सदसत्त्वयोरन्यतरं पक्षमपेक्ष्याश्रित्य कथंचिद्वो जन्म भविष्यति यदि नाम तथाप्यमुष्य मनआदेरमृषात्वं सत्यत्वं नास्तीति तत्र हेतुमाह श्रुतिरिति आत्मैवेदं सर्वं ब्रह्मैवेदं सर्वं सर्वं खल्विदं ब्रह्म वाचारंभणं विकारो नामधेयमित्यादिश्रुतिरस्य जगतो मृषात्वमुवाच यतः अतः कारणान्मनआदेरन्वयव्यतिरेकाभावपरिहारेण शुक्तिकारजतादिवन्मिथ्यात्वमित्यर्थः ॥५०॥ मनआदेर्मिथ्यात्वे सिद्धे तत्फलितमाह मनस इति श्रु

यदि नाम कथंचिदमुष्य भवः सदसत्त्वमपेक्ष्य भविष्यति वः ॥ न तु चास्ति न तु अमुष्य तथापि न तु श्रु
तिरस्य मृषात्वममुष्य तथापि न तु श्रुतिरस्य मृषात्वमुवाच यतः ॥५१॥ मनसोऽनृततैव मवा
दि यतस्तत एव हि तस्य मृषाचरितं ॥ यत एव मृषा मनसश्चरितं तत एव पुरोदितसिद्धिरभूत्
॥५२॥ यदपेक्ष्य तु नाम भवेत्त्रितयं परमात्मपदस्य तुरीयमिति ॥ तदसत्यमसत्यगुणस्क्रयतः
त्या मनसोऽनृतता मिथ्यात्वमवादि यतस्तत एव तस्य मनसश्चरितमवस्थात्रयमपि मृषा भवेत् मनसश्चरितं मृषेति
यतः अत एव पुरोदितसिद्धिरभूदित्यर्थः ॥५१॥ किं पुनस्तत्पुरोदितमपेक्षायां तद्दर्शयति यदिति त्रितयं यदवस्थात्रय
मसत्यं तत्र हेतुमाह असत्यगुणस्क्रयत इति असत्यस्य मनसो गुणोऽवस्थात्रयमिति यस्मात्तस्मादवस्थात्रयमसत्यं
तत्र दृष्टांतमाह परिनिर्मितेति यथा रज्ज्वामारोपितस्य सर्पस्यासत्वात्तद्धि सर्पेणस्याप्यसत्यत्वं तद्वन्मनसोऽसत्यत्वा
त्तन्निबंधनतुरीयत्वमपि नाममात्रमतो निर्विशेषब्रह्मरूपत्वाद् इत्युक्तं ॥५२॥
मपेक्ष्य परमात्मपदस्य तुरीयमिति नाम भवेत्तदवस्थात्रयं ३

परिनिर्मितसर्पवत् ॥५३॥

इतश्च कारणात्कणादमतमयुक्तमित्याह । प्रतिषीति । समस्तगुरोर्गुरुणा नासतो विद्यते भावो नाभावो विद्यते सत इत्यमुना वचनेनेदं कणभोजिमतं प्रतिसिद्धं निरस्तं नन्वर्जुनं प्रलोभयितुं हरिणा कणादमतं निराकृतं न तु हितोपदेशं कर्तुमिति चेन्नैवमित्याह । ब्रुवताचेति पृथातनयायकुंतीपुत्रायस्वबांधवायार्जुनायस्वभक्तायहितं ब्रुवताहितोपदेशं कुर्वताहरिणा कणभोजिमतं निरस्तमित्यर्थः ७७ ॥ एवं सदसतोजन्म निरस्तमनूद्य दिगंवरमतं निरस्यति । असतेति

प्रतिसिद्धमिदं कणभोजिमतं हरिणापि समस्तगुरोर्गुरुणा । वचनेन न तु नासत इत्यमुना ब्रुवताच पृथातनयाय हितं ७७ ॥ असतश्च सतश्च न जन्म भवेदिति पूर्वमवाद्युपपत्तियुतं । सदसच्च न जायत एव कुतो न हि वस्तु तथाविधमस्ति यतः ७८ । सदसत्वमतीत्यमनः प्रभृते न कथं च न वृत्तिरिहास्ति यतः ततएव मनः प्रमुखस्य भवो न भवेदिति सर्वसुवेद्य ति

मयाऽत्रवादि

असतश्च सतश्च न जन्म भवेदिति पूर्वमुपपत्तियुतं युक्तिसहितं मयाऽवादि गदितं सदसच्च सदसदात्मकं कार्यं न जायेत तत्र हेतुं पृच्छति कुत इति हेतुं कथयति सिद्धांती नहीति । तथाविधं सदसदात्मकं वस्त्वेव नास्तीति यतः अतस्तस्य जन्मापि दूरोत्सारितमित्यर्थः ॥ ७८ ॥ सदसत्सदसतामुत्पत्त्यसंभवे परिशेष्यात्कार्यस्यानिर्वाच्यत्वं सिद्धमित्याह सिद्धांती । सदसत्वेति एकस्य वस्तुनः । सदसदात्मकत्वासंभवान्मनः प्रभृतेर्जगतः सदसत्वमतीत्य सत्वमसत्वमतीत्य कथं चन वृत्तिर्नास्ति प्रकारांतरेण वृत्तिर्नास्तीति यतस्तत एव मनः । प्रमुखस्य जगतः

उत्पत्तिविनाशश्च वा जन्म विनाशान्यथानुपपत्त्या निर्वचनीयत्वं सिद्धमित्यर्थः ॥ ७९ ॥

एवंनिर्विशेषतयापरिशोधितस्यत्वंपदार्थस्यपरिशोधितेन तदर्थेनैक्यमत्रमहावाक्यार्थ इतिकथयति लवणेरि
ति स्वविलक्षणवस्तुनिषेधनतः आत्मव्यतिरिक्तवस्तुनिषेधेन लवणैकरससमंकार्यकारणगंधरहितमव
बोधघनंयत्परमात्मपदं तदहमस्मीतित्वंसदानिरंतरमवेहिहेयोपादेयबुद्धिरहितः सन्परमानंदतयातिष्ठे
त्यर्थः ५६ प्रतिपत्तिसौकर्यार्थंयथोक्तमखंडवाक्यार्थंप्रपंचयति आविति स्थूलदेहधर्मकृत्स्वत्वदीर्घत्वरहि

लवणैकरसत्वसमंफणितंस्वविलक्षणवस्तुनिषेधनतः अवबोधघनंपरमात्मपदंत्व
मवेहितदस्मिसदाहमिति ५६ अणुनोनचतद्विपरीतगुणोनचक्रस्वमतोनचदीर्घम
पि प्रतिषिद्धसमस्तविशेषणकंपरमक्षरमात्मातयाश्रयभो ५७ असुबुद्धिशरीरगु
णान्यडिमानविवेकजनेहशिधर्मतया प्रतिपन्नतमान्यविहायशनैर्दृशिमात्रमवेहि
सदाहमिति ५८

तंसूक्ष्मशरीरधर्माणुत्वरहितंतद्विपरीताकाशादिधर्ममहत्वरहितंएवंप्रतिषिद्धसमस्तविशेषणकंनिर्वि
शेषंपरमक्षरमात्मतयाश्रयस्वरूपत्वेन आश्रयेत्यर्थः ५७ अनेनश्लोकेन तत्पदार्थप्राधान्येनाखंडवाक्या
र्थं प्रपंच्य त्वंपदार्थप्राधान्येनप्रपंचयति असुविति अविद्वज्जनैरविवेकतया दृशिधर्मतयाप्रत्यगात्मधर्म
तयाप्रतिपन्नतमान्यष्टसंख्याकानसुबुद्धिशरीरगुणानशनपिपासाशोकमोहजरामरणादिलक्षणाननना
त्मधर्मतयाप्रविहायदित्वाशनैः [illegible] दृशिमात्रंकेवलंज्योतिः [illegible] प्रत्यगात्मानमहंस्यवेहिजानीहीत्यर्थः ५८

इदानीं परमप्रकृतमुपसंहरति । निखिलेति मनः प्रमुखस्य जगतो वितथत्वं मया पूर्वं श्रुतियुक्तिबलेनावादीति यतश्चातः कारणादद्वयकं परमक्षरमेव सत्यमन्यत्सर्वं कार्यकारणात्मकं द्वैतमसत्यमित्यर्थः ॥ ५३ ॥ ब्रह्मव्यतिरिक्तं सर्वं मायामयत्वादसत्यमित्येतच्छ्रुतियुक्तिभ्यां सिद्धमित्युक्तमिदानीं कारयोश्रुतिरित्यपेक्षायां तदेतद्ब्रह्मापूर्वमनपरमबाह्य मनंतरमित्यादिकेत्याह श्लोकद्वयेन । यदिति पूर्वकारणं तद्रहितं मपूर्वं स्वयं सिद्धत्वात्कारणरहितं किंच अबाह्यं जाता त

निखिलस्य मनः प्रमुखस्य यतो वितथत्वमवादि पुरा तु मया । श्रुतियुक्तिबलेन ततोऽद्वयकं

८ परमक्षरमेव सदन्यदसत् ॥ ५३ ॥ यदपूर्वमबाह्यमनंतरकं न च किंचन तस्य भवत्यपरम् इति प

वेदवचोनुशशास यतो वितथं परतोन्यदतः प्रगतम् ॥ ५४ ॥ प्रतिसिध्यति यो बहिरंतरयोः स्व

विलक्षणमात्मन उक्तवती । अवबोधघनत्वमतोन्यदसच्छ्रवणैकरसत्वनिदर्शनतः ॥ ५५ ॥

अनंतरं नानांतररहितं १

दिरहितं यदेवं निर्विशेषं परमात्मपदं तस्यापरं किंचिन्नास्ति स्वव्यतिरिक्तं किंचिदपि नास्तीत्येवं वेदवचोनुशशासे त्यतः । अत एव परतः परस्मादक्षरादन्यदसत्यं वितथमिति प्रगतं प्रकर्षेणावगतमिति ॥ ५४ ॥ एवं बहिरंत रयोरात्मनः स्वविलक्षणं सर्वं प्रतिसिध्यावबोधघनत्वं प्रज्ञानघनत्वं लवणैकरसत्वनिदर्शनतः । यथा सलिल कार्यं लवणं सलिलमात्रं तथा परमात्मविवर्तं जगदपि परमात्मैवेत्यात्मनोवबोधघनत्वमुक्तवती श्रुतिः अपूर्वमनपरं सयथा सैंधवघनइत्यादिका [illegible] निर्विशेषत्वमुक्तवतीत्यर्थः ॥ ५५ ॥

अज्ञानाज्ञाना[illegible] [illegible]त्मनोज्ञानाज्ञानसंबंधोस्ती[illegible]त्याशंक्याह [illegible] रजेति रवेः सूर्यस्य रजनीदिवसो
भवतस्तत्र हेतुमाह प्रमयेति एव रविः सततं प्रमयायुतः यतः कारणात्तस्या होरात्रे न भवतः [illegible]

३ तद्वदपि ज्ञानाज्ञानगुणो न भवतः ६१ आत्मनि ज्ञानाज्ञानयोरसंभवाद्बंधमोक्षावपि न संभवत इत्याह परिशुद्धेति परिशुद्धविशुद्ध

अ० सार आत्मज्ञानाच्छरीराभिमानः सचात्मज्ञानान्निवर्तत इत्युक्ते तर्ह्यात्मनोज्ञानाज्ञानसंबंधोस्तीत्याशंक्य नेत्याह मुक्त दृशे

३७ रजतेति रवेः सूर्य्यस्य रजनीदिवसो न भवतस्तत्र हेतुमाह प्रमयेति एव रविः सततं प्रमयायुतः यतः कारणात्

तस्या होरात्रे न भवतः नित्यदृशेः सदाशुद्धबुद्धमुक्तस्वभावस्य चिन्मात्रज्योतिषो मम अविवेक विवेक विवर्जन

तः ज्ञानाज्ञानविवर्जनतः बंधमोक्षगुणो कदाचिदपि न संभवत इति भृशं तात्पर्येणावगच्छ ज्ञानी हीत्यर्थः ६२

28 रजनीदिवसो न रवेर्भवतः प्रमयासततं यत एव युतः ॥ अविवेक विवेक गुणावपि ते भवतो

न रवेरिव नित्यदृशेः ॥ ६१ ॥ परिशुद्धविशुद्धविमुक्तदृशेरविवेकविवेकविवर्जनतः ॥ मम बंधवि

मोक्षगुणो भवतो न कदाचिदपीत्यवगच्छ भृशं ॥ ६२ ॥ न मम ग्रहणं न च मास्ति मया न परेण

दृशेरिति निश्चिनु भो ॥ नहि कस्यचिदात्मनि कर्म भवेन्न च कश्चिदिहास्ति मदन्य इति ॥ ६३ ॥

आत्मनि बंधमोक्षयोरभावेपि ग्रहणं च नेपरस्य कृते संभवत इत्याशंक्याह ॥ न ममेति ॥ दृशेर्विज्ञप्तिमात्रस्य निरव

यवस्य मम ग्रहणं च नं नास्ति मयाऽन्येन वा उपादानं परिमोचनं वा नास्तीति भवान्निश्चिनु मम मया ग्रहणं

च नेनास्तीत्यत्र हेतुमाह नहीति कस्यचिदात्मनि स्वस्मिन्कर्म न भवेद्धि विषयविषयीभावो न भवेदेकस्मिन्व

स्तुनि कर्तृकर्मविरोधादित्यर्थः परेणाप्यात्मनि हानोपादाने न स्त इत्यत्र हेतुमाह नचेति इह लोके मदन्यः

आदात्मा नास्ती तित्तत्र प्रमाणाभावादित्यर्थः ६३

एवमखंडवाक्यार्थो दर्शितः। इदानीमेवंभूतवाक्यार्थज्ञानं यदा दृढतरं भवति। तदाप्रारब्धकर्मभोगपर्यंतं जीवन्मुक्तिरूपं दग्धपटन्यायेनबाधितानुवृत्त्याद्वैतदर्शनाभासात्परमानंदैकरूपपरितृप्तिलक्षणं वाक्यार्थजं ज्ञानफलंप्राप्तो भविष्यतीति दृष्टांतेन दर्शयति श्लोकद्वयेन। अहीति तद्यथाहिनिर्ल्वयनीवल्मीके मृता। प्रत्यस्ताशयीतइति जी

अहिनिर्ल्वयनीमहिरात्मतया जगृहे परिमोक्षणतस्तु पुरा। परिमुच्य तु तामुरगः स्वबिले न पुनः समवेक्षत आत्मतया ॥५९॥ अविवेकत आत्मतया विदितं कुशरीरमिदं भवताप्यहिवत्। अहिवत्त्यज देहमिमं त्वमपि प्रतिपद्य चिदात्मकमात्मतया ॥६०॥

वन्मुक्तश्च ते। यथाहि सर्पः। परिमोक्षणतः पुरा अहिनिर्ल्वयनीं भुजंगनिर्मोकं आत्मतया जगृहे गृहीत्वा पुनः। कालांतरे स उरगः। अहिनिर्ल्वयनीं कंचुकं स्वबिले परिमुच्य पुनरात्मत्वेन न समीक्षते न पश्यति तथा भवतापीदं शरीरमन्नमयादिकं कंचुकमविवेकतः। आत्मानात्मविवेकाभावे आत्मतया विदितमहिवदिति। यस्मात्तस्मात्त्वमपि चिदात्मकं वस्तु स्वात्मतया प्रतिपद्य पश्चादहिवदिमं देहं त्यज देहाभिमानं त्यजेत्यर्थः ॥६०॥

श्रु०तिसा एवंतावदस्मिन्प्रकरणेसमन्वयाविरोधसाधनफलाध्यायार्थचतुष्टयंसविस्तरंवर्णितमिदानींतदेवार्थः॥ चतुष्ट
२८ यंसंक्षिप्यकथयतिप्रकारंसमाप्तिपर्यंतेनग्रंथेनतत्रप्रथमंतत्त्वमस्यादिवाक्यानामद्वितीयेब्रह्मणिसमन्वयंवक्तुं
तत्पदार्थंपरिशोधयतिबहुनेतिश्लोकद्वयेन॥ बहुनेति एवंमहताप्रयत्नेनाभिहितेनबहुनाकिमुच्यतेकिंत्व

बहुनाभिहितेनकिमुच्यतेशृणुसंग्रहमत्रवदामितव॥ त्वयिजागरितप्रभृतित्रितयंपरि
कल्पितमित्यसदेवसदा॥६७॥ परिकल्पितमित्यसदित्युदितंमनइत्यभिशब्दितमागमतः॥ त
उपपत्तिभिरेवचसिद्धमतोभवतोन्यदशेषमभूतमिति॥६८॥

योजनंततः॥ कारणादत्रसंग्रहंवदामि उक्तमेवार्थंसंक्षिप्यकथयामिपरिशुद्धदृशोत्वयिजागरितप्रभृतित्रयं
मनोधर्ममवस्थात्रयंतत्साक्षिणित्वयिपरिकल्पितमविवेकात्तस्मादारोपितंसर्वमसदेवसर्वकल्पनाहेतु
भूतंमनइत्यभिशब्दितम[illegible]पिकल्पितंत्वय्यध्यस्तंयतअतएवागमतउपपत्तिभिरेवचतन्मनोऽप्यसत्
असत्यमित्युदितंअतएवभवतोन्यदशेषमभूतमसत्यमितिसिद्धं॥६८॥

ननुस्थावरादिव्रह्मांतेषुशरीरेष्वात्मभेदान्मदन्यः।कश्चिदात्मानास्तीत्येतत्कथंघटतेइत्यत्राह।अहमस्मीति
चरस्थिरदेहधियांचरितस्याहमेकएवसदाईक्षकःसाक्षीयतःअतएवमदन्यःस्वात्मनोऽन्यस्यानुपलंभादेव
मदन्यःकश्चिदात्मानभवेदितिसुमेधःइदंमयोपदिष्टंसुदृढमवेहि।६४।तर्हिचरस्थिरदेहादीनिपरमार्थतोभी
न्नानितथासतितत्कृतःकश्चिद्विशेषआत्मनोपिस्यादित्याशंक्याह गगनइतिविमलेगगनेजलदादिमतेः
सतिवाअसतिवायथाभिदाभेदोनास्तिनिरवयवत्वात्तथापरिशुद्धदृशोत्वय्यपिद्वयभेदकृताभिदानास्तीत्यर्थः

अहमस्मिचरस्थिरदेहधियांचरितस्यसदेक्षकएकइति।नभवेदतएवमदन्यइतित्वमवेहिसु
मेधइदंसुदृढं।६४।गगनेविमलेजलदादिमतेःसतिवा।सतिवानभिदास्तियथा।त्वयिसर्व
६ गतेपरिशुद्धदृशोनभिदास्तितथाद्वयभेदकृता।६५।अनृतंद्वयमित्यवदामपुराव्यव
न हारमपेक्ष्यतुगीतमिदं।अनृतेनसत्यमुपेतियुजांनमरीचिजलेननदीकृदिनी।६६।

द्वयभेदकृतःकश्चित्कदाचिदात्मनोनासतिर्वीशसइतिचुवताद्वयसद्भावोंगीकृतःस्यादित्याशंक्याह।अनृतमि
ति।पुरावद्भिर्युक्तिभिरितज्जगदनृतमित्यवदामउक्तवंतोवयंयस्मात्तस्मात्।व्यवहारमपेक्ष्यप्रपंचस्यव्यावहा
रिकसत्यत्वमपेक्ष्यांगीकृत्येदंगीतमित्युक्तंयस्मादेवंतस्मादनृतेनसत्यमात्मवस्तुयुजांयोगंनोपैतितत्रदृष्टांतमाह
नमरीचीति।कृदिनीनदीअगाधजलानदीअसत्येनमरीचिजलेनयथायुजांनोपैतितद्वदात्माप्यसत्येनसंबंध
नोपैतीत्यर्थः।६७।

30

अ० सार अधुनेति। अधुनासुनिर्वृत्तोस्मि सर्वदा आत्मरतिरत एव कृतकृत्यः सर्वत्रापि उपेक्षकः अतएव एकमनाः मृग
३९ तोयसमान्मरीच्युदकसमान्विषयान्मनः परिकल्पितान् अहं सन् भवता सहितो महीं विचरामीत्युक्तवानित्यर्थः
॥७२॥ यावदायुस्त्वयो वंद्यो वेदांतो गुरुरीश्वरः। आदौ विद्याप्रसिद्ध्यर्थं कृतघ्नत्वापनुत्तये इति वशासनादाचार्यसका शि
शाद्ब्रह्मविद्यस्य शिष्यस्य गुरुं प्रत्यवश्यं कर्तव्यं लोकशिक्षार्थं दर्शयति। तव दास्यमिति यद्यपि आनेनोशनासन
पानादिना शरीरधृतिं प्रतिपद्यामरणाद्देहपतनपर्यंतं तव दास्यं भृशं करवाणि करिष्यामि मया शकनीयं शक्यमि

अधुनास्मि सुनिर्वृत आत्मरतिः कृतकृत्य उपेक्षक एकमनाः। अहं सन्विषयान्मृगतोय
समान् मृगतोयसमान् विचरामि महीं भवता सहितः॥७२॥ तव दास्यमहं भृशमामरणा
ग त्प्रतिपद्य शरीरधृतिं भवन्। करवाणि मया शकनीयमिदं तव कर्तुमतोन्यदशक्यमि
ति॥७३॥

दमेव अतोन्यत्कर्तुमशक्यमात्मत्वान स्वप्रत्युपकारं कर्तुमशक्यत्वादिदं दास्यमेव मया कर्तुं शक्यं किंच सोहं
भगवते विदेहान्ददामि मां चापि सह दास्यायेति मिश्रितेः। यथा पूर्वं याज्ञवल्क्याय तत्त्वोपदेष्टे जनकः स्वरा
ज्यं दत्वा ऽनंतरं स्वदेहमपि गुरवे दत्तवान् इममभिप्रायं मनसि कृत्वा मयाप्येवं कर्तव्यमित्युक्तवानि ४०

एवं त्वंपदार्थं परिशोध्य तत्पदार्थं परिशोधयति । यदिति । यद्वाह्यं जात्यादिरहितं अनंतरं निरवधिकं एकरसं केवलं
चिदानंदस्वरूपं यद् अकार्यमकारणं कार्यकारणास्पृष्टं अद्वयकं सजातीयविजातीयभेदरहितं । यदशेषविहीनत
रं कर्तृभोक्तृत्वादिविशेषरहितं हशिरूपं प्रज्ञानघनमनंतं देशतः कालतो वस्तुतश्चापरिच्छिन्नं ऋतं सत्यं यत्प
रमात्मपदं तदेव त्वमसीत्येवं प्रत्यगात्मनो ब्रह्मत्वं जानीहीत्यर्थः ॥ ६९ ॥ एवमखंडवाक्यार्थमुद्दिश्य गुरुः । किं कृ
तवानित्यपेक्षायामाह । इयदिति पिप्पलादः यथा सुकेशादीन् शिष्यानल्पमप्यवदद् इत्यर्थः किमर्थमियदेवेत्युक्त

यद्वाह्यमनंतरमेकरसं यद् अकार्यमकारणमद्वयकं ॥ यदशेषविशेषविहीनतरं हशिरू
पममं तममृतं तदसि ॥ ६९ ॥ इयदेव मयोपनिषत्सु पदं परमं विदितं न ततोऽस्त्यधिकं ॥ इति
पिप्पलभट्ट इवाभ्यवदद्धि वशिष्टमतिं विनिवारयितुं ॥ ७० ॥ इतरोपि गुरुं प्रणिपत्य ज
गौ भगवन्नितितारितवानसि मां ॥ भववोधतरेण समुद्रमिमं मृतिजन्मजलं सुखदुःख
झषं ॥ ७१ ॥

वानित्यत्राह अवशिष्टेति । गुरुणा अननुशिष्टां शिष्येणापेक्षितामवशिष्टां मतिं निवर्तयितुमित्यर्थः ॥ ७० ॥
एवं गुरुणोपदिष्टः शिष्यः किं कृतवानित्यपेक्षायां शिष्यवाक्यवलेन जीवन्मुक्तिलक्षणं ज्ञानफलं दर्शयति
इतरोपीति भो भगवन्मृतिजन्मजलं सुखदुःखझषमिमं संसाराब्धिं भववोधतरेण ॥ ज्ञानप्लवेन संसा
रोदधौ पतितं मां सुखेन तारितवानसि एवमितरोपि शिष्यो गुरुं प्रणिपत्य जगौ विज्ञापितवान् ॥ ७१ ॥ ७१

गुरुभक्तिप्रसादात्परिसमापितग्रंथः सन्सद्गुरुभक्तिरेवज्ञानप्रत्यंतरंगसाधनमिति दर्शयितुं ग्रंथांते गुरून्नमस्करोति श्लोकशिखार्थं । एवमिति मम भजन्ममरणसंतानदोलारूढेः । दोलावदितस्ततः संचारशीलस्य स्वांतस्य मनसो हेतुध्वांतमज्ञानं तत एषां गुरूणां धीसूर्यदीप्त्या स्वर्यप्रकाशेन प्रतिहतमभिभूतमेकांततो

एवं धीसूर्यदीप्त्या प्रतिहतमगमञ्जाशमेकांततो मे ध्वांतं स्वांतस्य हेतुर्जननमरणसंता
नदोलाधिरूढेः ॥ एवं पादौ प्रपन्नाः क्षितिशमविनयैर्भूषिताः ॥ शिष्यसंघाः सद्यो
मुक्तौ स्थितास्तान्यतिपरमहितान्यावदायुर्नमामि ॥ ७७ ॥

ऽस्तंतं नाशमगमत् किं च क्षितिशमविनयैर्भूषिताः शिष्यसंघा एषां गुरूणां पादौ प्रपन्नाः । सन्तः सद्यो मुक्तौ स्थितास्तान्यतिपरमहितान् यतीनां परमहितान् गुरून् भगवत्पादाख्यान्यावदायुर्नमामि यावज्जीवं नमामीत्यर्थः ॥ ७७ ॥

यएतत्प्रकरणमर्थतोजानाति तस्यसंसारनिवृत्तिरेवफलमितिदर्शयति ।गुरुशिष्येति ।श्रुतिवद्गुरुशिष्यकथाश्र
वणेनगुरुशिष्ययोः ।कथातत्त्वनिर्णयफलात्तस्याःश्रवणेनगुरुशिष्यसंवादरूपेणइत्थंकृतंश्रुतेःसारसमुद्धर
णमुपदेशप्रकरणंयोवेत्ति अर्थतोजानातिसोशिष्योमृतिजन्मजलेसंसारोदधौनपततीत्यर्थः ॥७४॥गुरुदेवता
भक्तियुक्तानांपरमहंसानामस्मिन्प्रकरणेऽधिकारइत्याह भगवद्भिरिति ।गुरुभक्तियुतैर्भगवद्भिः ।परमहंसै
रिदंप्रकरणंपठितव्यंअतोन्यजनैरपाठ्यं साधनचतुष्टयसंपत्तिरहितैरपाठ्यंगुरुभक्तिमतएवगुरुणोपदि

गुरुशिष्यकथाश्रवणेनमयाश्रुतिवत्कृतिसारसमुद्धरणं ।कलमिंस्यमवैतियएतदसौन
पतत्युदधौमृतिजन्मजले ॥७४॥भगवद्भिरिदंगुरुभक्तियुतैःपठितव्यमपाठ्यमतोन्यज
नैः ।गुरुभक्तिमतः प्रतिभातियतोगुरुणोक्तमतोन्यजनोनपठेत् ॥७५॥निगमोपिचयस्य
इतिप्रभृतिर्गुरुभक्तिमतःकथितंगुरुणा ।प्रतिभातिमहात्मनइत्यवदत्पठितव्यमतोगुरुभ

क्तंप्रतिभातिसफलंभवत्यतोन्यजनः विषयेष्वासक्तबुद्धिर्नपठेदित्यर्थः ॥७५॥गुरुभक्तिमद्भिरेवसंन्यासिभिरि
दंपठितव्यमित्युक्तं तत्रकिंप्रमाणमित्याकांक्षायां अस्याश्रमिभ्यः ।परमंपवित्रंप्रोवाच सम्यगृषिसंघजुष्टं यस्य
देवेपराभक्तिर्यथादेवेतथागुरौतस्यैतेकथिताह्यर्थाः ।प्रकाशन्तेमहात्मनइतिश्रुतिरेवप्रमाणमित्याहनिगमइ
ति गुरोस्तेनहवर्द्धमानविद्यासंयुक्तस्यमहात्मनएवगुरुणाकथितमुपादिष्टमात्मतत्त्वंप्रतिभातिसम्यक्
प्रकाशतइत्येवंनिगमोप्यवदत् ।उक्तवान्तस्माद्गुरुभक्तिमताःपठितव्यमित्यर्थः ॥७६॥